210

Chaturmasya Prayoga (Āshvalāyana) : Title

Raghunāth : Author

2 Kunda Pradipa of : ~~Editor~~

[illegible]ādeva : Year, Vols.

: Publisher

210 : Remarks

॥श्री॥ अथ विछिन्नाधानं॥ विछेदनिमित्तानंतरं क्रियमाणे तस्मिन्नर्तुनक्षत्रादिकालादरःका
र्यः॥ शुक्रास्तादेर्मलमासस्य च सत्वेपि नोत्कर्षः॥ अनेनैवाशयेन ग्रंथकर्तॄणां कालानाद
रोक्तिः॥ यन्नैमित्तिकमस्मिन्नृतुगतास्याधानमित्युपक्रम्य अधिकामास्येवमाद्येवचरेदिति
दीपोक्तेश्च कालांतरे क्रियमाणे विछिन्नाधानेतु विहितकालादरो निषिद्धकालपरिहारश्च
पूर्वाधानवदेव कार्यः॥ एवं मृतभार्यः पुनर्विवाहानंतरं विछिन्नाधानं कुर्वन्विहितकाला
दरेण निषिद्धकालपरिहारेण कुर्यात्॥ प्रतिबंधापगमे चिन्हितकालानादरेण कुर्यात्॥
वस्तुतस्तु स्वरूपमग्निं परित्यागी ब्रह्मण्यो देवहीयत इति प्रत्यवायश्रवणात्॥ एवं विछिन्ना
धानेपि॥ आहरणे पुंसः स्वातंत्र्यप्रतीत्या विछिन्नाधानोचित्यात्॥ अविलंबस्य चाहिविध
कालशास्त्राविरोधेनाप्युपपत्तेः॥ एकया सहायापरापरिणयने त्वर्धाधानेनाशुद्धयसं

इति बौधायनोक्तपक्षासंभवे शांखायनोक्तैकाहिकप्रयोगोप्यनुष्ठेयः॥ तस्य फाल्गुनी
चैत्री वैशाखी आषाढी श्रावणी भाद्रपदी कार्तिकी मार्गशीर्षी पौर्णमासी प्रयोगकालः
॥ वारुणप्राघासिकं तंत्रं॥ अथ मनपिथ्यप्रयोगपक्ष एव॥ तत्राश्वलायनस्य बौधायनी
यमतमवलम्ब्य पक्षप्रयोगपक्षमवलंब्य चातुर्मास्यानि चिकीर्षोः रूपमुक्तः प्रयोगउ
च्यते॥ चातुर्मास्यान्यारप्स्यमानोन्वारंभणीयापूर्वदिने प्रातर्वैश्वदेवं कृत्वा पुण्याहवाच
नपूर्वकं नांदीश्राद्धं रात्रौ कुर्यात् शांतिप्रतिसरबंधौ विधाय प्रातः स्नानादिपंचकांते पश्चा
त्कार्दपत्यस्य देशादिनिविष्टमिस्यंते ॐ स्वर्गकाम मम्पद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चा
तुर्मास्यैर्यक्ष्ये॥ तन्मध्ये ध्यनामित्यादि ॐ नथेस्यंते त्विग्वरणमर्हणं च कृत्वा॥ पुनः प
श्चाद्गार्हपत्यस्य स्यंत्यादिनिविष्टमिस्यंते॥ चातुर्मास्यान्यारप्स्यमानो वैश्वानरपार्जन्येष्ट्या

यद्दैवे॥ तन्मसूर्ध्यतामित्यादि॥ ॐ तथेत्युक्ते वैश्वानरपार्जन्येष्टिसंबंधिहविः॥ व्रीहिमयः
पुरोडाशो द्रव्यं॥ व्रीहिमयश्चरुः॥ पंच प्रयाजाः॥ अग्नीषोमावाज्यभागौ॥ अग्निर्वैश्वानरः
पर्जन्य इति प्रधानदेवते॥ अग्निः स्विष्टकृदित्यादि समानं॥ यजमानस्य इत्युक्ते इध्मसंभरणांतं पौ
र्णमासवत्कृत्वा कर्मणे वामित्यादि॥ पात्रासादने॥ स्फ्यं च कपालानि च॥ २ चरुस्थाली
ति च मेक्षणं चेति विशेषः॥ निर्वापे॥ देवस्य त्वा० न्यामग्नये वैश्वानराय जुष्टं निर्वपामि॥ देव०
न्यां पर्जन्याय जुष्टं [illegible] निर्वपामि॥ प्रोक्षणे॥ देवस्य त्वा० न्यामग्नये वैश्वानराय जु
ष्टं प्रोक्षामि पर्जन्याय॥ मनसा चरुपुरोडाशीयान्विभज्याधिवपनं॥ देवस्य त्वा० न्या
मग्नये वैश्वानराय जुष्टमधिवपामि॥ कपालोपधाने॥ द्वादशकपालान्युपधाय॥ आ ॥२॥
देवयजनं वदेति निहितां गार्हे चरुस्थालीं समपश्चानीय॥ ध्रुवासि पृथिवीमिति तामधि

तिरःपवित्र

भिस्तनिर्दग्धमित्यंगारैः प्रदक्षिणं परिचिनु[illegible]यात्॥ जनयत्यै त्वा संयौमीत्युक्ते च
तुर्धा तं नाम्ना चरुपुरोडाशीयानभिमृश्य पुरोडाशप्रथनांते आज्यं प्रकृतिवन्निरूप्य स्थाल्यां
तिरःपवित्रे तंडुलानावपति॥ घर्मोऽसि विश्वायुरिति॥ पुरोडाशश्रपणांते चरुमुद्वास्य
हृष्टं ह्रस्वत्वा॥ ततः पुरोडाशे संब्रह्मणेत्यादि स्फ्यकृत संमार्जना नामस्याकारेण मंत्रेणो
त्करे निरासः॥ पुरोडाशो द्वासनांते आप्यायतामिति चरुमभिघारयेत्॥ अग्नये वैश्वानर
राय जुष्टमभिघारयामि॥ पर्जन्याय जुष्टमभिघारयामीति विशेषः॥ चरुं श्रृतंउत्स्नातीस्फ
द्वास्य॥ आर्द्रं तु वनस्य गोपा इत्यभिघारयेत्॥ चरोर्नोपांजने॥ प्रधानमुपांशु॥ अग्न
ये वैश्वानरायेदं॥ अग्ने वैश्वानरस्याहं देवयज्यया शुचिः पूतो मेध्यो विपाप्मा ब्रह्मव
र्चस्यन्नादो भूयासं॥ चरोर्मेक्षणेनावदानं॥ पर्जन्यायेदं॥ पर्जन्यस्याहं देवयज्ययापसुय

बुसो न्युपासं॥ स्विष्टकृतमवदायमेक्षणं चादायान्वाक्रम्य कृत्वामेक्षणमनुप्रहृत्य सर्वं स्त्र
वेणाभिजुहुयात्॥ अन्वाहार्यमासाद्य हिरण्यं धेनुं च दद्यात्॥ अग्न्याधेये हिरण्यं कृत्तु
युगां॥ इति प्रतिग्रहः॥ अग्नेर्वैश्वानरस्याहमुज्जितिमनूज्जेषं॥ पर्जन्यस्याहमुज्जि
प्र तिं॰ शेषं पूर्ववत्॥ पुनराधानं नवनं संनिष्ठितेष्वाग्रयणतर्पणं नेष्टिः॥ अथ चातुर्मास्या
दिनादिनिविष्टमिस्यंते वैश्वदेवहविर्निर्वपणे॥ तन्म… ध्यतामित्यादि… ओं न थेत्यंते॥
वैश्वदेवं हविः॥ व्रीहिमयः पुरोडाशोऽष्टकपालः॥ व्रीहिमयश्चरुः॥ आमिक्षा च॥ नवप्र
याजाः॥ अग्नीषोमावाज्यभागौ॥ अग्निः सोमः सविता सरस्वती पूषा मरुतः स्व त व
सो विश्वेदेवा द्यावापृथिवी इति प्रधानदेवताः॥ अग्निः स्विष्टकृन्नवानुयाजाः॥ सू ॥३
क्तवाकशंयुवाकौ॥ इत्यादि सद्यो यक्षे॥ यूपकाले वैकंकतीयप्रहरति॥ अनयन

ने… अभिधाना… पस्य इति॥ विहारारंभपक्षे निष्क्रामः पशुबंधवत्॥ व्रतां ते ध्वर्यु बादि शां
रिडाजपादि… मसि… वेद्युत्करयोरंतरेण प्राचीमुदीचीं गत्वा यत्र वेत्स्य स्या…
गत्वा बहुपर्णामसकविरामशुष्काग्रां पलाशस्य शम्या वा शाखां छिनत्ति॥ इषे त्वेति॥ आ
पणुपस्पृश्य॥ ऊर्जे त्वा इत्यनुमार्ष्टि… हरति॥ इमां प्राचीमुदीचीमिषमूर्जमभि सं
सृष्टानां॥ बहुपर्णामशुष्काग्रां हरामि पशुपामहमिति॥ ततः शाखया सह गत्वा
गोष्ठं गत्वा षडवरान्वत्सानपाकरोति॥ वायवस्थेति पुंसः॥ उपायवस्थेति स्त्रियः॥
यदि संसृष्टाः॥ संसृष्टेनेव मंत्रेणापाकुर्यात्॥ वायवस्थोपायवस्थेति॥ प्रतिवत्सं मं
त्रावृत्तिः॥ वत्सानां मातृः प्रेरयति॥ प्रेरणं प्रपक्करणं॥ देवो वः सविता प्रार्पयतु
श्रेष्ठतमाय कर्मणे॥ आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजाव

तीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशंसो रुद्रस्य हेतिः परि वो वृणक्त्विति ॥ य
जमानं स्मरति ॥ ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरिति ॥ यथागतमेत्यं जघनेन गार्हपत्य
मग्निहोत्रस्योत्तरार्द्धे वाग्न्यागारस्योपगूहति ॥ यजमानस्य पशून्पाहीति ॥ ततो देव
स्यत्वंस्यामि दाहानादि ध्मसंनरणांतं ॥ तत्र प्रस्तरमयः प्रस्तरः ॥ मुष्टित्रयं पुन एको
मुष्टिरिति मुष्टित्रयं बर्हिः ॥ कार्ष्मर्यमयाः परिधयः ॥ ततस्त्वेत्रयोविंशतिधेति
विशेषः ॥ ततः शाखायाः पर्णानि छित्वाग्रेण गार्हपत्यं निधाय मूलं छित्वा [illegible]
पवं संहृत्वा गार्हपत्यात्पश्चान्निदध्यात् ॥ शाखामूले दर्भमूलानि बध्वा त्रिगुणां रज्जुं
प्रादेशमात्रीं संप्रसार्याग्रेण ग्रंथीयात् ॥ त्रिवृत्स्थला शेदर्नं शुष्यां प्रादेशमं मितः ॥ मुष्टि ॥४॥
पुनिर्रुपोलनमं पर्यो हृत्यं कर्तो कुमेदति ॥ अथ पयसा सायमग्निहोत्रं हुत्वा कृतश्रो

वं रक्षेत् ॥ होमांते गार्हपत्यस्योत्तरतस्तृणेषूदोहनपात्रं शाखापवित्रं स्थाल्यां विति हृदंत्यं चि
मादयित्वोत्तानीकृत्य कमंडलुजलैः सकृन्मंत्रेण हिरणकी प्रोक्षेत् ॥ शुंधध्वं दैव्याय कर्मणे
ये देवयज्याया इति ॥ ततो जघनेन गार्हपत्यस्योत्तरतस्तृणेषूदोहनपात्रं पवित्रोपवेषेणायतनांतरे
वोदीचोंगारानपोहति ॥ मातरिश्वनो घर्मोसि ॥ तेषु स्थालीमधिश्रयति ॥ द्यौरसि पृथिव्यसि वि
या श्वधाया असि परमेण धाम्ना दृंहस्व मा ह्वाः ॥ इति ॥ तस्यां प्रागग्रं शाखापवित्रं निदधाति
॥ वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारं इति ॥ तदन्वारभ्य वाचं यमआ
पतीर्गाः प्रतीक्षते ॥ एता आचरंति मधुमद्दुहानाः प्रजावतीर्यशसो विश्वरूपाः ॥ बह्वीर्भव
न्तीरुपजायमाना इह व इंद्रो रमयतु गावः ॥ परिकर्मिणमाह ॥ उपसृष्टां मे प्रब्रूतात्
सवत्सां विमुच्य प्रस्याह ॥ उपसृष्टा ॥ दुह्यमानामनुमंत्रयते ॥ हुतस्तोको हुतो द्रप्सोग्नये बृ

हुवेनाकायुस्त्वा ह्याद्यावापृथिवीभ्यां॥ परिक्रमी अंतरेण वेद्युत्करौ प्रपद्य स्थाल्यां पयः आनयति॥ अ
ध्वर्युः स्थाल्यां पुरस्तात्तस्य अनुख्यं स्थितं च तं परिक्रमिणं पृच्छति॥ कामधुक्षः प्रणो ब्रूहि विश्वेभ्यो दे
वेभ्यो हुविरिंद्रियं॥ स आह॥ गंगां॥ यस्यां देवानां मनुष्याणां पयो हितं॥ अध्वर्युस्तामनुमंत्रयते
॥ सा विश्वायुः॥ एवमुत्तरयोः॥ तत्र यमुनां॥ सा विश्वव्यचाः॥ सरस्वतीं॥ सा विश्वकर्मा॥ इति वि
शेषः॥ अध्वर्युस्तिस्रः दुग्ध्वा सुवाचं विसृजते॥ बहु दुग्धि विश्वेभ्यो देवेभ्यो हव्यमाप्यायतां पुनः
॥ वृत्तेभ्यो न नु ब्वेभ्यः पुनर्दोहायकल्पतां॥ पुनः प्रयोगचिकीर्षाया अभावे नैष मंत्रः॥ अनन्त
रभ्यो तरास्तूष्णीं दोहयित्वा दोहनपात्रे ऽप आनीय संक्षालनं कुंभ्यामानयति॥ संपृच्यध्वमृता
वरी रूर्मिणीर्मधुमत्तमा मंद्रा धनस्य सातये॥ तस्योदगुद्वास्य शीतीकृत्योदगग्रं पवित्रं निधा ॥५॥
यस्कचेण यावदलंदध्यातनक्ति॥ सोमेन त्वा तनच्मि विश्वेभ्यो देवेभ्यो दधि॥ अग्निहोत्रोच्छेष

णमभ्यातनक्ति॥ यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनुसंतनोमि॥ कुंभ्यामुपरि पवित्रं निधा
योदककूर्णेन कंसेनाच्छादयति॥ अदस्तमसि विष्णवे त्वा यज्ञायापिदधाम्यहं॥ अद्भिररिक्तेन
पात्रेण याः पूताः परिशेरते॥ शिक्यादौ निदधाति॥ विष्णो हव्यं रक्षस्व॥ ततो गोष्ठं गत्वा प्रा
तर्दोहाय तूष्णीं दर्भैर्वत्सानपाकरोति॥ सिद्धदुग्धमात्र ग्रहणे तु वत्सापाकरणप्रभृतीनां स
चनप्रभृतीनां मंत्रान्नैव ब्रूयात्॥ इदं च सर्वं सोमयागोत्तरानुष्ठाने॥ प्राक् सोमेज्याया अमंत्र
काणि पयांसीति वचनात्॥ अस्मिन्पक्षे शाखाहरणादि सर्वममंत्रकं॥ सद्यस्कालपक्षे तु त्रिवृ
त्करणांतं॥ न सायंदोहः॥ प्रातर्दोहाय पात्रासादनमात्रं॥ तत्रैकैव स्थाली॥ प्रातर्दोहाय तूष्णीं द
र्भैर्वत्सापाकरणमिति विशेषः॥ ततो ध्रुवकाले प्रातर्हुतेऽग्निहोत्रे सद्यस्काले त्वेतदानीमे
व हुत्वा वनेजनात्प्रभृत्यास्तरणादि पूर्ववद्गार्हपत्ये स्मार्त्तवदाज्यं संस्कृत्य जुह्वां चतुर्गृहीतं गृही

त्वाऽऽहवनीये समिधमाधाय पर्युक्ष्य परिस्तीर्य यजमानान्वारब्धः पंचहोतारं मनसानुद्रुत्य जुहो
ति ॥ अग्निर्होता ॥ अश्विनाऽध्वर्यू ॥ त्वष्टाग्नीत् ॥ मित्र उपवक्ता ॥ सोमः सोमस्य पुरोगाः ॥ शुक्रः शुक्र
स्य पुरोगाः ॥ श्रातास्त इंद्र सोमाः ॥ वातापेर्हवनश्रुतः स्वाहा ॥ यजमानः वातस्पतये ब्रह्मण इदं ॥ पू
र्वास्तरणात्पूर्वं होमेन परिस्तृणाति ॥ ततस्तेनैवाज्येन कूष्मांड रुवीपस्थानवरदामांते ध्वर्युः सारस्व
तौ जुहोति ॥ नवा होम पक्षे चतुर्गृहीतं गृहीत्वा ॥ पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी
जिगाय ॥ तस्यां देवा अधि संवसंत उत्तमे नाक इह मादयंतामग्नीषोमौ प्रथमौ वीर्येण वसून्रु
द्रानादित्यानिह जिन्वतं ॥ माध्यं दिह पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृतेन साताव थास्मभ्यं
सहवीरां रयिं नियच्छतं स्वाहा ॥ पौर्णमास्या इदं ॥ पुनस्तथैव गृहीत्वा ॥ निवेशनी संगमनी ६
वसूनां विश्वा रूपाणि वसून्यावेशयंती ॥ सहस्रपोषं सुभगा रराणा सा न आगन्वर्चसा सं

विदानाय त्वं देवा अदधुर्भागधेयममावास्ये संवसंतो महित्वा ॥ सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धे
हि सुभगे सुवीरं स्वाहा ॥ अमावास्याया इदं ॥ पंचहोत्राद्येतदंतं प्रथमप्रयोग एव ॥ विकृतौ प्रोनान्वा ८
रंभणीयाया अननुष्ठानवत्पंचहोतृसारस्वतहोमयोरप्यननुष्ठानमिति सांप्रदायिकाः ॥ अथ
हस्तावनेजनादि स्फ्यं च ४८ कपालानि च ४ चरुस्थालीश्च ४ मेक्षणानि च ॥ जुहूं च कुहूं सं च ॥ उ
पभृतं च पृषदाज्यग्रहणीं च ॥ २ आज्यस्थालीश्च दारुपात्रीं चाशयपात्रीं चानिक्षाबुद्धरणपात्रीं
च ॥ धृष्टिं चोपवेषं चेति ॥ सविशेषाणि पात्राण्यासादयेत् ॥ निर्वपेद् ॥ देवस्य त्वा० भ्यामग्नये जुष्टं नि
र्वपामि ॥ देवस्य० भ्यां सोमाय जुष्टं० ॥ देवस्य० भ्यां सवित्रे जुष्टं० देवस्य० भ्यां सरस्वत्यै जुष्टं० ॥ देवस्य० भ्यां पू
ष्णे जुष्टं० ॥ देवस्य० भ्यां मरुद्भ्यः स्वतवद्भ्यो जुष्टं० ॥ देवस्य० भ्यां द्यावापृथिवीभ्यां जुष्टं० मि ॥ निरुप्तानुमंत्रणं
सरस्वत्यादिषु ॥ अग्निं होतारमिह तं हुवे देवीर्यज्ञियां इह रुयाहवामहे ॥ आयंतु देव्यः सुम

नस्य मा ना विषं तु दे व्यो हविर्षोमि अस्य ॥ निरुप्तानि मर्शनं ॥ इदं देवानामिति छन्नन्यायात् ॥
एवं प्रोक्षणे ॥ देव० म् अग्नये वो जुष्टं प्रोक्षामि सोमाय सवित्रे सरस्वत्यै पूष्णे मरुद्भ्यः स्वतवद्भ्यो द्या
वापृथिवीभ्यां ॥ कस्त्वा युनक्ति स त्वा युनक्ति स्यं नेष्ठा तर्दरिः सायं दोहवत् ॥ मातरिश्वन इ
त्यादि पुरग्रयेण पवित्रेण आतंचन पिधान वर्जं नवस्वापाकरणं ॥ चरु पुरोडाशीयान्विनज्य ॥
सरस्वत्यै देव० म् अग्नये जुष्टं मधिवपामि सवित्रे पूष्णे मरुद्भ्यः स्वतवद्भ्यो द्यावापृथिवीभ्यां ॥ इत्यधिवपनं
॥ धृष्टिरसीत्युपवेषमादायतेनाग्नये ष्टौ कपालान्युपधाय पूर्ववत्सोमाय चरुस्थालीम
धिश्रित्य मुखं धृष्टैवांगारैः परिचिनुयात् ॥ तथैव सवित्रे द्वादशकपालान्युपधाय ॥ सरस्व
त्यै पूष्णे च चरुस्थाल्यौ ॥ मरुद्भ्यः स्वतवद्भ्यः सप्त कपालानि ॥ ततस्तूष्णीमंगारं तत्र तूष्णीं स्थाल्यौ ७
तस्यां निरःशाखा पवित्रं निधाय प्रातर्दोहमानीयमेक्षणेनालोड्य श्रपयति ॥ ततो मंत्रेणांगारं

तस्मिन् ध्रुवमसीत्येककपालं ॥ तत्र निर्दग्धमित्यंगारं निदधाति ॥ यद्धर्मैककपालमुपचिन्वंति वेधसः ॥
पूष्णस्तदपि व्रतइंद्रवायू मुंचतां ॥ पूष्णः पिष्टानि विनज्य ॥ संवपने ॥ देव० म् अग्नये जुष्टं संवपामि
सवित्रे मरुद्भ्यः स्वतवद्भ्यो द्यावापृथिवीभ्यां ॥ यथादैवतमभिमर्शनं ॥ आग्नेयमधिश्रित्य मंत्रव
दाज्यं तूष्णीं दधि चापूर्वाज्यं च निरूप्य ॥ सौम्य सारस्वतस्थाल्योस्तंडुलान् ॥ घर्मोसि विश्वायु
रः ॥ पौष्ण्यास्थाल्यां पिष्टानि समानयति ॥ घर्मोसि विश्वायुरिति ॥ पयस्विन्यां स्वापवित्रं निधा
य द्वयोः पक्षे सायं दोहं दध्यानयति ॥ सद्यः पक्षे लौकिकं ॥ सामिक्षा ॥ तां कश्चित्कुशलः श्रप
यित्वा विनष्कवाजिनां कृत्वा शीतलदेशे निदधाति ॥ एककपालमधिश्रयति ॥ स्वबंगदूहीवे
त्यादि ॥ चरुषु अग्ने हव्यं रक्षस्व ॥ प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च सं
कृद्भ्यं च संमृड्डि पत्नीं सन्नह्याज्येन च दध्ना चोदेहीति ॥ अग्नीध्रः दक्षिणेन स्रुवं तु दूके

सोपभृतस्य ध्रुवाज्यग्रहणीः सव्येन ध्रुवां प्राशित्रहरणं वेदपरिवासनं चादाय ॥ जुहूं संमृ
ज्य ॥ वाचं प्राणं मानि मृक्षं वाजिनं त्वा सपत्नसाहं संमार्ज्मीति कण्ठं संसंमार्ष्टि ॥ उपभृतं सं
मृज्य तद्वत्पृषदाज्यग्रहणीं संमार्ष्टि ॥ संमार्जनमुत्करे निरस्यति ॥ आज्यग्रहणं ॥ उपभृति
प्रकृतिवच्चतुर्गृहीतं गृहीत्वा पृषदाज्यग्रहण्यां द्विरुपस्तृणाति ॥ महीनां पयोसीति
प्रथमं ॥ यजमानोनुमंत्रयते ॥ सुवीर्याय त्वा ॥ विश्वेषां देवानां तनूरिति द्वितीयं ॥ यज॰ ॥
सुप्रजास्त्वाय त्वा॰ ॥ तत्र बर्हिषी अंतर्धायाधिश्रितं दध्यानयति ॥ ऋध्यासमद्य पृषती
नां ग्रहं पृषतीनां ग्रहोसि ॥ बर्हिषी उद्धृत्य तदभिघारयति ॥ विष्णोर्हृदयमसीति ॥ यज॰ राय
स्पोषाय त्वा॰ ॥ पुनरभिघारयति ॥ एकमिषविष्णुस्त्वानुविचक्रमे भूतिर्दध्ना घृतेन वर्ध ९
तामिति ॥ यज॰ ब्रह्मवर्चसाय त्वा॰ ॥ बर्हिरास्तरणे ॥ मुष्टित्रयमध्ये कीलकस्य प्रथममुष्टिमा

स्तृणाति ॥ एवं द्वितीयतृतीयौ ॥ प्रस्तरमासाद्य तस्मिन्विस्रस्याविस्रस्य वा शाखापवि
त्रमासादयति ॥ स्रुक्सादने ॥ उपभृदनंतरं पृषदाज्यग्रहण्यास्तन्मंत्रेणासादनं ॥ सर्व
त्र पृषदाज्यग्रहण्यामुपभृद्धर्मभिवंति ॥ हविरुद्वासने ॥ दारुपात्र्यां स्योनं त इति त्रिरुपस्ती
र्य श्रायपात्रे च सकृन्मंत्रेणोपस्तीर्य सप्तकपालांतं यथादैवतमुद्वास्य मुद्धरणपात्र्यां तू
ष्णीमुपस्तीर्याभिस्थां पुनः स्वस्थानेधिश्रित्य तूष्णीमभिघार्योद्वास्य मुद्धरणपात्र्यामु
द्धृत्य तदुपरि किंचिद्वाज्जिनं स्रुवेणानीय पुनरभिघार्यालंकरोति ॥ यस्ते आत्मा पशुषु प्र
विष्टो देवानां विष्ठामनु यो वितस्थे ॥ आत्मन्वान्त्सोम घृतवान्हि भूत्वा देवान्गच्छ स्वर्
विंद यजमानाय मह्यं ॥ तत एककपालमुद्वास्याज्यपात्रे निधायापूर्वाज्येनाविःपृष्ठं
करोति ॥ कपालोद्वासने ॥ यद्घर्ममेककपालमुपचिन्वंति वेधसः ॥ पूष्णास्तदपीतिविरो

ह्रः ॥ वाजिनमुत्करे वा विशाखे वा साग्नीं तं वेदिं दृष्ट्वा सादयति ॥ भूर्भुवः स्वरोमिति स्व
वरिति वा ॥ यजमानोऽनुमंत्रयते ॥ यन्मे अग्न इति ॥ अथाध्वर्युरुत्करे तूष्णीं कृष्णाजिनमास्तीर्य घा
र्यधिमंथनशकलं तत्र प्रागायतं निदधाति ॥ अग्नेर्जनित्रमसीति ॥ तस्याश्वर्ययोः सदैव
प्रागायते अन्ये शकले निदधाति ॥ वृषणौ स्थः ॥ दक्षिणोत्तरारण्यां हस्ताभ्यामुत्तराधरा
रणी आदत्ते ॥ उर्वश्यस्यायुरसि पुरूरवाः ॥ ते अपूर्वाज्यस्थाल्यां समनक्ति ॥ घृतेनाक्ते वृष
णं दधाथां ॥ अधिमंथनशकले अरणी निधाय यजमानं वाचयति ॥ गायत्रं छंदोनु प्रजा
यस्व त्रैष्टुभं छंदोनु प्रजायस्व जागतं छंदोनु प्रजायस्व ॥ होतारमाह ॥ अग्नये मथ्य
मानायानुब्रूहि ॥ मथित्वा जातं आहृ जातायानुब्रूहि ॥ प्रह्रियमाणायानुब्रूहि इत्युक्त्वा ९
॥ यजमानान्वारब्धो जातमग्निमाहवनीये रण्ये जुहोति ॥ नवतंनः समनसौ स्तमो

कसावरेपसौ ॥ मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥ ततः स्रु
वेणापूर्वाज्यं जुहोति ॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ॥ स्वा
हाकृत्य ब्रह्मणा ते जुहोमि मा देवानां मिथुया कर्भागधेयं स्वाहा ॥ यज० प्रविष्टाया
ग्नय इदं० ॥ होतरेहीत्यादि चतुरः प्रयाजानिष्ट्वा पंचमादीन्मध्ये जुहोति ॥ चतुर्थपं
मयोः समानयमानोऽष्टमे सर्वं समानयति ॥ यज० चतुरः प्रकृतिवदनुमंत्र्य पंचमेने
न शानन्तुमंत्रयते ॥ प्रयाजशेषेण स्रुवाप्य न्तिपुनर्ध्रुवाभिघारणवर्जं यथाक्रमं ह
१५ वींष्यभिघार्य तु पत्न्यानेपूषराज्यमभिघारयेत् ॥ अथ प्रधानं ॥ अग्नेरहं देवय
ज्ययान्नादो भूयासं ॥ सोमायेदं० ॥ सोमस्याहं देवयज्यया प्रप्रजया च पशुभिश्च
ऊनिषीय ॥ सवित्र इदं० ॥ सवितुरहं देवयज्ययास्वस्तिमान्पशुमान्भूयासं ॥ सर

स्वत्या इदं ॥ सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयं ॥ पूष्ण इदं ॥ पूष्णोऽहं देवयज्य
या पुष्टिमान्पशुमान्भूयासं ॥ मरुद्भ्यः स्वतवद्भ्य इदं ॥ मरुतांᳪ स्वतवसामहं देवयज
यया प्राणैर्ऋध्यासं ॥ आमिक्षामुपस्थानाभिमर्शनवर्जं स्रुवेण द्विरवदाय तूष्णीं प्र
स्तराभिघारयेत् ॥ विश्वेभ्यो देवेभ्य इदं ॥ विश्वेषां देवानामहं देवयज्यया प्राणैः सायु
ज्यं गमेयं ॥ जुह्वामुपस्तीर्य एककपालमुपस्थाभिमर्शनवर्जं सर्वमवदायाश्रयपात्रा ना
द्द्वितीयमवदाय ध्रौवाज्यादभिघार्याश्रये प्रत्यभिघार्य पर्यावर्तयन्नच्छिन्नं जुहुया
त् ॥ द्यावापृथिवीभ्यामिदं ॥ द्यावापृथिव्योरहं देवयज्यया उभयोर्लोकयोर्ऋध्या
सं ॥ अध्वर्युः संस्रावेणाभिजुहुयात् ॥ मधुश्चेति च तस्यैवाज्याहुतीराज्यस्था १०
ल्याज्यात्स्रुवेण जुहुयात् ॥ मधुश्च स्वाहा ॥ मधव इदं ॥ माधवश्च स्वाहा ॥ माधवा

येदं ॥ शुक्रश्च स्वाहा ॥ शुक्रायेदं ॥ शुचिश्च स्वाहा ॥ शुचय इदं ॥ ततः स्विष्टकृदंतं मेक्षण
न्यंतं प्रहृत्य सर्वं संस्रावेणाभिजुहुयात् ॥ अन्वाहार्यमासाद्य द्वादश गाः प्रथमजं वत्सं च द
दाति ॥ ब्राह्मणा ओदनं रुद्राय गास्तानिरमत ॥ इति प्रतिमंत्रः ॥ हविःशेषानुद्रास्य ॥ वाजिनं
गार्हपत्येऽधिश्रित्याभिघार्योद्वास्य पुनरभिघार्य ॥ यस्त आत्मा पशुषु प्रविष्टो देवानां विष्ठा
मनु यो वितस्थे ॥ आत्मन्वान्सोम घृतवान्हि भूत्वा देवान्गच्छ स्वर्विंद यजमानाय मह्यं ॥
दूस्यजं कृत्य ॥ भूर्भुवः सुवरिति संनवैद्या सादयेत् ॥ यज० यन्मे अग्न इत्यनुमंत्रयते ॥ अध्व०
र्युस्रुक्स्थाभ्याम इत्यादि पृषदाज्यं जुह्वामानीयास्यां उपस्तीर्याश्रयपात्रे च सकृन्मंत्रेणोप
कृम्य नेनानूयाजान्यजति ॥ यज० यन्मे तीतरान् ॥ समस्मा स्योमे निशृयजेन ॥ यज० देवाय बर्हिष
इदं ॥ बर्हिषोऽहं० प्रजावान्भूयासं ॥ देवीभ्यो द्वार्भ्य इदं ॥ द्वारामहं० प्रजावान् ॥ देवीभ्यामुषा

२

सान ऋत्व्यामिदं०॥ उषासानक्तं यो० प्रजावान्०॥ देवीन्यां जोष्ट्रीन्यामिदं०॥ जोष्ट्र्योरहं० पशुमा
न्०॥ देवीन्या मूर्जाहुतीन्यामिदं०॥ ऊर्जाहुत्योरहं० पशुमान्॥ देवान्यां दैव्यौ न्यां होतृन्यामि
दं०॥ दैव्ययोर्होत्रोरहं० पशुमान्०॥ ९॥ देवीन्यास्तिस्रन्यस्तिस्रन्यो देवीन्य इदं०॥ तिसृणां तिसृ
णां देवीनामहं० युष्मान्युक्तेन०॥ ७॥ नराशंसस्याहं०॥ पशुमान्०॥ ८॥ अग्नेः स्विष्टकृतो
हं० युष्मान्०॥ ९॥ देवीन्यां द्वान्यां उषासानक्तान्यामिदमित्यादि यथालिंगं त्यागः॥ अथास
पत्नानि तिसक्तदुद्धारितेन मंत्रेणोपस्तृणुयादाज्यमग्रहण्यो रहः सदैव॥ वियन्तु वयइत्य
स्याहुतिः॥ यथादैवतमुत्क्रितिवाचनं॥ धाम्नाप विचेणसदुप्रस्तरप्रहरणं॥ उपस्तस्य
दाज्यग्रहणीन्यां स्रुसंस्रावहोमः॥ स्रुग्विमोके॥ अग्नेर्वामपन्नगृहस्य सदसि सादयामि ११
सुम्नाय सुम्निनी सुम्ने मा धत्तं धुरि धुर्यौ पातं॥ कंसमंतर्वेदि निधाय बर्हिषि सर्वतः पात
न्यः=

यन्कं सेवाजिनमानयन्नारम्भमध्यमस्वरेण॥ वाजिन्यो नु ब्रूहि॥ वाजिनो यज॥ प्रथमवष
ट्कारे॥ वाजिन्यः स्वाहेति कृत्वा द्वितीयेनत्वर्णीं जुहुयात्॥ यज० प्रथमे वाजिन्य इदं०॥ वाजि
नो महं देवयज्ययारेतस्वी भूयासं॥ द्वितीये अग्नय इदं०॥ अग्नेरहं देवयज्यया युष्मानयुक्तेने
प्रतिभागमिय॥ अध्वर्युरुदङेत्य मतेपं कं संहोतुर्हस्ते दद्यात्॥ सर्वेन्वारभेरन्॥ होतुरुपह
वांते ध्वर्युः होतरुपह्वयस्व॥ ब्रह्मन्नुपह्वयस्व॥ अग्नीदुपह्वयस्व॥ यजमानोपह्वयस्व॥
॥ इत्युपहवं कुर्यात्॥ एवमन्ये॥ वेद्यां निधायोपहवक्रमेण किंचित्किंचिदादाय सर्वे सौत्रेण
॥ यन्मे रेतः प्रसिच्यते यदा मे अपि गच्छति यद्वा मायते पुनः॥ तेन मामृतं मा शिवं मा विशन्तेन मावा
जिनं कुरुतस्यतं वाजिपीनस्योपहूतस्योपहूतो नक्ष्यामि इत्यनेन उपहवक्रमेण वद्धं भक्ष
यंति॥ प्रत्यसुं यज्वा॥ निर्णिज्य पात्रं निदध्यात्॥ समिष्टयजुः काले तं वेदिं दक्षिणपरातिष्ठ

न्नध्वर्युर्ध्रौवाज्यात्स्रुवेणजुहोति॥ यज्ञयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा॥ य
ज्ञ॰ यज्ञायेदं॰॥ पुनः॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकः सुवीरः स्वाहा॥ यज्ञपतयइ
दं॰॥ देवागातुविदइत्यादिप्रकृतिवत्॥ यज्ञविमोकांतेयजमानःउत्करउपवेषस्य
स्थूलप्रदेशमुपगूहति॥ यंदेवामनुष्येषूपवेषमधारयन्॥ येअस्मदपचेतनस्तत्ता
नस्मभ्यमिहाकुरु॥ उपवेषोपविड्डिनःप्रजांपुष्टिमथोधनं॥ द्विपदोनश्चतुष्पदोध्रु
वाननपगाकुरु॥ ब्राह्मणतर्पणांतेयजमानःप्राङ्मुखःस्वस्थानस्थःसंकल्पयेत॥
केशान्निवर्तयिष्ये॥ नै[illegible]श्मश्रूणिवापयिष्ये॥ अधःशायिष्ये॥ मधुमांसलवणान्य
वलेखनानिवर्जयिष्ये॥ नदंतोधावयिष्ये॥ नवासःप्रक्षालयिष्ये॥ नान्नंतंवदिष्ये॥ न १२
पादौप्रक्षालयिष्ये॥ नान्यस्यार्त्विज्यंकरिष्ये॥ नांजयिष्ये॥ ना[illegible]पं[illegible]जयिष्ये॥ न

= दंतान् =

न्मयेनपास्यामीति॥ वासःप्रक्षालनमृत्स्नादिना॥ सांवत्सरिकादिष्वजातपुत्रऋतौभार्यामुपेया
त्॥ अथतदवभृथस्ययजमानस्यपुरःप्रत्यङ्मुखआसीनोध्वर्युःप्रागादिक्रमेणामध्येचेति
पंचधाव्येण्याशजत्याशिरोविभजति॥ ऋतमेवपरमेष्ठी॥ ऋतंनात्येतिकिंचन॥ ऋ
तेसमुद्रआहितः॥ ऋतेभूमिरियंश्रिता॥ अग्निस्तिग्मेनशोचिषा॥ तपआक्रां
तमुष्णिहा॥ शिरस्तपस्याहितं॥ वैश्वानरस्यतेजसा॥ ऋतेनास्यनिवर्तये॥ सत्येन
परिवर्तये॥ तपसास्यानुवर्तये॥ शिवेनास्योपवर्तये॥ शग्मेनास्याभिवर्तये॥ श्री
र्भस्त्वंऋतंतत्सत्यं॥ तदृतंतच्छकेयं॥ तेनशाकेयंतेनराध्यासं॥ इतिप्रतिविभागंमंत्रा
वृत्तिः॥ मंत्रावृत्त्यैवविभागक्रमेणवपनं॥ तच्चश्मश्रुपूर्वं॥ ततःस्नातोयजमानःस्व
स्थानस्थः॥ संवत्सरीणांस्वस्तिमाशास्त इतिवदेत्॥ ॥ इतिवैश्वदेवपर्व॥ ॥

॥अथ वरुणप्रघासाः॥ ॥तत्र विहारः॥ ॥प्राकृताहवनीयस्य पुरो मध्यशंकोर्द्विपदे शं-
कुं निहत्य तत्पुरोदेशे द्वादशपदेन्यं शंकुं निहन्यात्॥ अष्टादशपदमितां रज्जुमुभयतः
पाशां कृत्वा त्रयोदशपदांते चतुर्दशपदांते च चिह्नं कृत्वा शंक्वोः पाशौ प्रतिमुच्य त्रयो-
दशपदांते चिह्नं दक्षिणतउत्तरतश्चाकृष्य चतुर्दशपदांते शंकू निहन्यात्तावं-
सौ॥ रज्जुं विपर्यस्य दक्षिणतउत्तरतश्चाकृष्य त्रयोदशपदांते शंकू निहन्यात्ते
श्रोणी॥ एवं दशपदा पश्चात्तिरश्ची॥ अष्टपदा पुरस्तात्तिरश्ची॥ द्वादशपदा प्रा-
ची॥ पांशुवंधिकी वेदिर्भवति॥ वेदिपूर्वांतादाहवनीयस्य पश्चादर्धपदमवशिष्य षट्-
त्रिंशदंगुलप्रमाणां समचतुरस्रां प्रादेशोर्ध्वप्रमाणां जानुमात्रां शम्यामात्रीं ॥१३॥
वोत्तरवेदिमाहवनीयवत्साधयेत्॥ तस्या मध्ये प्रादेशमात्रां चतुरंगुलोन्न-

तां समचतुरस्रां जानुमात्रोच्छ्राये गोपदमात्रामुत्तरनाभिं कुर्यात्॥ पांशुकवेदेर्दक्षिणतो
दार्शिकी वेदिस्तथा कार्या॥ यथा नदीयाउत्तरश्रोण्यंसौ पांशुकवेदेर्दक्षिणतस्त्रयोदशांगु-
लात्यरीनवतः॥ उत्तरवेदी पश्चिमपार्श्वे समे॥ पांशुकवेदेरुत्तरांसमारभ्य चत्वारि पदानि
प्रत्यक्क्रम्य तदुत्तरत एकपदमतीत्योत्करो विहारद्वयसाधारणः कार्यः॥ उत्तरांसमारभ्यै-
व पदद्वयं त्रयं वा प्रक्रम्योत्तरतोपि पदं पदा॥ नीवानीस्य शम्यामात्रः समचतुरस्रश्चात्वा-
लः॥ दक्षिणवेदिपूर्वार्धेऽध्याहवनीयायतनमिति॥ ॥~~आहवनीय~~॥ ॥अथ पात्राणि॥ ॥
स्फ्यश्चाग्निहोत्रहवणी जुह्वादि च चतुष्टयं॥ मेक्षणं च मसीदारुपात्री च परिवासनं॥
वेदस्य वेदको धृष्टिः स्थाल्यौ सर्पिः प्रधानयोः॥ इति प्रतिप्रस्थातुः॥ ॥तानि च सौवर्णानि
राजतानि शमीमयानि वा॥ वैश्वदेववदध्वर्योः॥ प्रस्तरयो प्रस्तरौ॥ वैश्वदेववदेकमिध्मा

बर्हिः॥ परं पश्वत्॥ द्विशतानूर्ध्वं शमीपर्णानि॥ करीरसक्तून्॥ कौशमैषिकं वा शूर्पं॥
गार्हपत्यदक्षिणे दृष्टानां यवानां श्लक्ष्णपिष्टानि तत्र तत्र प्राग्दीर्घेनैन दध्ना वा संयुज्य यजमा
नतत्पुत्रपौत्रनार्यप्रवृत्तदुहितृसमसंख्याकान्येकातिरिक्तानि॥ दीपाकाराणि करंभ
भ पात्राणि॥ तेषामेव पिष्टानां सशृंगं मेषं सशृंगां मेषीं च तौ सुकूर्मप्रच्छिन्नौ पवल्कुशानदं
वदारू परिधीन्कुर्यात्॥ सुगंधितृणं मेषशृंगमध्ये स्यन्तामूर्णां च संपादयेत्॥ ततो
यजमानः दक्षिणपक्षे अरणी गार्हपत्ये प्रतितपति॥ अयं ते योनिः॰ सीदार्यानो वर्ध
यागिरः॥ अजस्रपक्षे तूष्णीमितरयोरपि॥ अथ पत्न्यन्वारब्धोऽरणी संचारांश्चादायोदकु
ते पुरस्कृत्य शालापरीत्य पूर्वया द्वारा प्रपद्य॥ प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं ॥२४॥
वह नः प्रजानन्॥ प्रजां पुष्टिं रयिमस्मासु धेह्यथाभव यजमानाय शंयोरिति मंथेत॥

अथाध्वर्युः श्रोच्छ्वमानं कृत्वोद्धृत्य वा उभयोरुद्धरणपक्षे आहवनीयं प्रणीयाजस्रपक्षेऽग्नीनि
हृत्य स्मार्त्तवदाज्यं संस्कृत्य चतुर्गृहीतमाहवनीये जुहोति॥ मनो ज्योतिर्जुषतामाज्यं विच्छि
न्नं यज्ञं समिमं दधातु॥ या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहेति
॥ य॰ मनसे ज्योतिष इदं॥ विहरणपक्षे तमाहवनीयं परित्यज्य॥ यः पुरस्तादित्यादि वरुण
प्रघासहविर्निर्वपेत्॥ तन्मंत्रे ध्यातां॰ ओं तथेत्यं तेवरुणप्रघाससंबंधिहविः॥ व्रीहि
मयः पुरोडाशो द्रव्यं॥ व्रीहिमयश्चरुः॥ आमिक्षा च॥ नव प्रयाजाः॥ अग्नीषोमावाज्यभा
गौ॥ अग्न्यादिपूषांतेंद्राग्नी मरुतौ वरुणः कइति प्रधानदेवताः॥ अग्निः स्विष्टकृत॥
नवानुयाजाः॥ सूक्तवाकशंयुवाकौ॥०॥ सद्यः श्वोवा यक्ष्यमाणत्वं ते॥ प्रकृतिवद्विहृत्य
त्वाधाय व्रतातं॥ अध्वर्युः पंचविधं बर्हिः स्तातात्रिविधं बर्हिः॥ त्रयो विद्धिशातिधं तूष्ण

उभयोःसंचरणंच॥स्थालामारुत्यैसायंदुह्यात्॥ततोध्वर्युर्वारुण्ये॥तत्रइदंवांमरुतोरमयंतु
गावः॥मरुद्भ्योहविरिदं॥मरुद्भ्योदेवेभ्योहव्यं॥मरुद्भ्योदधि॥इतिस्थाली॥इदंवांवरु
णोरमयन्तुगावः॥वरुणायहविरिदं॥वरुणायदेवेभ्योहव्यं॥वरुणायदधि॥इत्यध्वर्यो
र्विशेषः॥शेषंवैश्वदेववत्॥कर्मणेवामितिपाणीसंमृशन्नुभौकुरुतः॥अध्वर्युरेवाग्नी
न्परिस्तीर्यासनानिकल्पयति॥दक्षिणवेदेर्दक्षिणतोब्रह्मासनं॥तत्पश्चाद्यजमानस्य॥
उत्तरवेदेरुत्तरतःप्रणीतायाः॥उत्तरवेदेरुत्तरश्रोण्यांहोतुः॥गार्हपत्यस्यपश्चात्पत्न्याः॥
उत्करआग्नीध्रः॥ततोध्वर्युरुत्तरवेद्यांपात्राण्यासादयेत्॥स्फ्यंचद्वात्रिंशत्कपालानिच
॥शेषंवैश्वदेववत्॥स्थानादक्षिणवेद्यां॥स्फ्यंचामिक्षास्थालींचमेक्षणंच॥अग्निहोत्र ॥२४॥
हवणींचजुहूंचकूर्चंसचोपभृतंचस्रुवंचध्रुवांचआज्यस्थालींचवेदंचपुरुरणापा

त्रींचवेदपरिवासनंचोपवेषंचइध्मप्रव्रश्चनंचदर्भंच॥ब्रह्मामंत्रेणनिरस्तनोपवेश
नेकुर्यान्नब्रह्मस्तरणं॥नयजमानोवृणुतेइति॥अध्वर्युरेवपृषदाज्यंप्राकृतवेद्यांस्तरणादि
॥उभौस्वस्ववेद्युत्तरतःपवित्रेकुरुतः॥अध्वर्युरेवोत्तरेणगार्हपत्यमुपविश्यप
रिकर्मिहस्ताच्चमसमादायतस्मिन्नुदग्रेपवित्रेनिधायेत्यादि॥प्रणीताउत्तर
वेदेरुत्तरतःप्रणीय॥सम्पूर्णामग्निहोत्रहवणीमादत्ते॥स्थानाग्निहोत्रहवणीमेव॥वे
जायत्वेत्यादायोनोप्रत्युष्टमितिप्रतितपनः॥अध्वर्युः॥पूर्णांतवैश्वदेववन्निर्
वैंद्राग्निभ्यांकायेतिनिर्वपेत्॥ततःउभौगार्हपत्यस्योत्तरतःस्वस्वप्रोक्षणीसं
स्कारंकुरुतः॥उत्तरतोध्वर्युःदक्षिणतःस्थातेतिउपवेशनक्रमः॥अध्वर्यु
र्यथादेवतंहवींषिप्रोक्ष्य॥इदंवःन्यामग्नयेवोजुष्टंप्रोक्षाम्यग्नीषोमाभ्यांसवित्रेसो

स्वत्यै पूष्ण इंद्राग्निभ्यां काय॥ पुनर्देवस्य त्वा० वरुणाय वो जुष्टं प्रोक्षामि सभूपाणिकरं
त्पात्राणि प्रोक्ष्य मेध्य मेधीशमीपर्णकरीरसक्तून्प्रोक्षेत्॥ मेघतदीपशमीपर्णेभ्यो न्यत्र
तिप्रस्थाता॥ मंत्रेणोन्नयोः स्रुचस्रुपात्रप्रोक्षणं॥ अध्वर्युरुक्तवांनिरस्यशेषानवत्तयार्थी
न्निदध्यात्॥ तंडुलप्रक्षालननानिनयनांते॥ प्रस्थाता मारुत्ये अध्वर्युर्वारुण्ये दोहयति॥
अथाध्वर्युः देवस्य त्वा० भ्यामग्नये जुष्टमधिवपामि सवित्र इंद्राग्निभ्यां काय॥ ग्नये स अ
वि■त्रे पूष्ण इंद्राग्निभ्यां कायेत्यधिवपेत्॥ कपालोपधाने अध्वर्युः ऐंद्राग्नौ तानुप
दध्यात्॥ ततः प्रस्थाता पूर्ववत्प्रातर्दोहं॥ ततोध्वर्युः प्रातर्दोहमधिश्रित्यैककपालमु
पदध्यात्॥ अधिवपनवत्संवपनं पूषवर्जं॥ अध्वर्युराग्नेयमधिश्रित्याज्यदधिनी निं ॥२६॥
रूप्या पूर्वाज्यं निर्वपति॥ अध्वर्युणा ऐंद्राग्नं तेष्वधिश्रितेषु प्रस्थाता मारुतीं प्रातर्दोहेमा

हेसायंदो

यंदोहमानी याज्येनि रूप्य वाजिनविभागांतं कुर्यात्॥ ततोध्वर्युर्वारुणीं प्रातर्दोहमानी
य वाजिनविभागांतं कुर्यात्॥ अथैककपालमधिश्रित्य त्वचं ग्राहयित्वा करंभपात्रं
शमीपर्णकरीरसक्तुभिः सह स्रुवर्बिःपर्यग्निकरोति॥ प्रस्थाता मेधीशमीपर्णाद्यै
र्विकैः सह स्रुचस्रुवैः॥ अध्वर्युः पांसुकवेद्या माय्यनिनयनांतं कुर्यात्॥ उभौ स्रुचस्रुवेदि
समीपे वेदादानादि कुरुतः॥ अध्वर्युः पांसुकवेदिं विमाय पुरः प्रभृति अग्निवत्स रिस्त
णीयात्॥ ततः पांसुकीं वेदिं संमार्ष्टि पूर्वापरोदक्षिणां॥ उभौ स्तंबयजुषी सहरतः॥ अ
ध्वर्युर्वहिर्निरंचोत्करे नुप्यन्नेव तिष्ठेत्॥ प्रस्थाता तूरि पांसुकयाः पश्चाद्रुगेनाहृत्य न्युप्य
गतोमत्तं तिप्रत्यागच्छेत्॥ एवं च कुर्यातां॥ उभौ पूर्वापरिग्राहौ परिगृह्णीतः॥ अध्वर्युरेवा
ह॥ इमे नराः कृणुत वेदीमेत्सवसुमंतो रुद्रवंतो आदित्यवंतो वर्मन्दिवो नाभा पृथि

व्याय घ्रायं यजमानो नरिष्येत॥ उभौ वेद्युद्धननं कुरुतः॥ अध्वर्युराह॥ अग्नीदित्थमु
तश्च त्रिर्हरेति॥ अग्नीध्र उत्तरवेदिम् इदं हृत्वा दक्षिणवेदिमद्धरति॥ अध्वर्युः स्फ्यमु
दपात्रं लौकिकं बर्हिः शम्यामित्येतत्समादाय॥ ... यजमानेत्यक्त्वा यजमानपत्नी
भ्यां सह चात्वालदेशं गच्छेत्॥ तत्र प्राङ्मुख उपविश्य चात्वालदेशं स्फ्येनोद्धत्यावोक्ष्यतस्य
पूर्वभागे उदीचीनकुंबां शम्यां निधाय तदंतः समीपे स्फ्येनोदगपवर्गमालिखति॥ वि
त्रायनीमेसि॥ दक्षिणतः पूर्ववत्प्रागपवर्गं॥ तिक्तायनीमेसि॥ पश्चिमतः पूर्ववदुदग
पवर्गमालिखति॥ अवतान्मानाथितं॥ उत्तरतः प्रागपवर्गं॥ अवतान्माव्यथितं॥ उ
दगग्रं बर्हिश्चात्वाले निधाय यजमानपत्नीभ्यामन्वारब्धस्तन्मूलं स्फ्येन प्रहरति॥ ॥१७॥
विदेरग्निर्नभोनामाग्ने अंगिरो यो स्यां पृथिव्यामसि॥ छिन्नं बर्हिर्मूलं सह तामदमाद

माददत्ते॥ आयुषा नाम्नेहि॥ तामुत्तरवेद्यां निवपति॥ यत्तेनाधृष्टं नाम यज्ञियं तेन त्वादधे॥
एवं द्वितीयादौ॥ यो द्वितीयस्यां॥ यस्तृतीयस्यामिति विशेषः॥ तूष्णीं चतुर्थं सह बर्हिषा
स्फ्येन चात्वालान्मृदमुद्धृत्याह॥ अग्नीदित्त्रिर्हरेति॥ सह त्वोत्तरवेद्यां त्रिर्निवपति॥
अध्वर्युस्तां मिश्रयति॥ सिंहीरसि महिषीरसि॥ समीकरोति॥ उरु प्रथस्वोरु ते यज्ञ
पतिः प्रथतां॥ स्फ्येन दृढयति॥ ध्रुवासि॥ उदपात्रस्थाभिरद्भिः प्रोक्षति॥ देवेभ्यः शुंधस्व
॥ सिकता निरनुप्रकिरति॥ देवेभ्यः शुंभस्व॥ शम्यया मील्वोत्तरनाभिं कृत्वा दर्भैः प्रच्छाद
यति॥ ततोऽध्वर्युः स्थाली ... त्रिप्रादेशैः परिमितैः काष्ठैर्बद्धा विध्मावाहवनीये मूलतो द
पयित्वा चात्वालमृत्पूर्णपात्रेण तदुत्तरतः स्थापयतः॥ अध्वर्युरपूर्वाज्यं जुह्वां तूष्णीं पंच
कृत्वो गृहीत्वा परिकर्मिणे प्रयच्छति॥ स्थातापिस्तकवाम पूर्वाज्यस्थालीमादायांतरेण चा

त्वाजोत्करावग्रेणोत्तरवेदिं परीत्य स्रुवेद्यां सादयित्वा पुनरागछंति ॥ अध्वर्युस्तूष्णीमुत्तरवे
दौक्तिकप्रोक्षणीरन्यहस्ते देवदारुरुक्मगंधितगरागुग्गुलमेषशृंगांतरालास्तरीमाणीनिब्र
ह्म हस्ते प्रयछति ॥ ब्रह्मा शुचिर्भूत्वा तीर्थेन प्रपद्याग्रेणाहवनीयं गत्वा निरसनादिजपांतं कृ
त्वा वाग्यत आस्ते ॥ इति केचित् ॥ अध्वर्युः अग्नये प्रणीयमानायानुब्रूह्यग्नीदेकस्फ्यया
नुसंधेहीत्याह ॥ अग्निं त्वां प्रणीयमानाभ्यामिति वा ॥ ततो मृत्पूर्णशरावे स्वमिध्ममादायो
त्तरतस्तिष्ठंति ॥ स्थातातदुत्तरेणागत्य तदिध्मस्य शालामुखीयस्य च मध्येन गत्वा प्रदक्षि
णमावृत्य प्रत्यङ्मुखो मृत्पूर्णशरावे स्वमिध्ममादायापसलैः पर्यावृत्य गछति ॥ आहव
नीयं रक्षतः ॥ होत्राय मुख्येत्यारब्धे स्वमग्निमादाय पत्नीयजमानाभ्यामन्वारब्धोऽध्वर्युरुत्तरे ॥२८॥
णोत्तरवेदिं गछेत् ॥ तदैव सर्वे प्रोक्षण्यादीन्युद्यछंते ॥ आग्नीध्रस्तु पश्चाद्धोतृस्थानमा

रभ्योत्तरश्रोणिपर्यंतं स्फ्येन लेखया होतुः परं प्रछादयन्नेति ॥ ब्रह्मा दक्षिणतो व्रजञ्ज
पति ॥ आशुः शिशान इति सूक्तमभाषो निरसनादिजपांतं कुर्यात् ॥ सर्वेऽध्वर्युमनुग
छंति ॥ अध्वर्युरुत्तरवेदिसमीपं गत्वान्यहस्तेऽग्निं दत्वा प्रोक्षणीरादाय प्रागादिक्रमेण
मध्ये समापयन्नुत्तरवेदिं प्रोक्षणीरादाय प्रागादिक्रमेण मध्ये समापयन्नुत्तरवेदिं
प्रोक्षति ॥ इंद्रघोषस्त्वा वसुभिः पुरस्तात्पातु ॥ मनोजवास्त्वा पितृभिर्दक्षिणतः पातु ॥
प्रचेतास्त्वा रुद्रैः पश्चात्पातु ॥ अप० ॥ विश्वकर्मा त्वादित्यैरुत्तरतः पातु ॥ ततः प्रोक्षणीः
प्रोक्षमुत्तरवेद्या दक्षिणेंसे निनयेत् ॥ परिकर्मिहस्तात्कुंभमादाय तन्मुखं हिरण्यं लं
बयित्वा दक्षिणांसमारभ्य यावन्मध्यं व्याघारयति ॥ सिंहीरसि सपत्नसाही स्वाहा ॥
उत्तरश्रोणिमारभ्य यावन्मध्यं ॥ सिंहीरसि सुप्रजावनिः स्वाहा ॥ दक्षिणश्रोणिमा

रन्यया वन्मध्यं ॥ सिꣳहीरसि रायस्पोषवनिः स्वाहा ॥ उत्तरांसमारभ्य यावन्मध्यं ॥ सि-
ꣳहीरस्यादित्यवनिः स्वाहा ॥ मध्ये व्याघारयति ॥ सिꣳहीरस्यावह देवान्देवयते यजमा-
नाय स्वाहा ॥ सर्वत्रोत्तरवेद्या इदं ॥ अध्वर्युः स्रुचमुद्गृह्णाति ॥ भूतेभ्यस्त्वेति ॥ ततो ब्रह्म-
हस्तात्तं नानादायना[illegible]नेः पश्चादारभ्य देवदारुपरिधीन्परिदधाति ॥ मध्यमं ॥ विश्वायु-
रसि पृथिवीं दृꣳह ॥ अथ दक्षिणं ॥ ध्रुवक्षिदस्यन्तरिक्षं दृꣳह ॥ अथोत्तरं ॥ अच्युतक्षि-
दसि दिवं दृꣳह ॥ अतिशिष्टान्संभारानुत्तरनाभौ निवपति ॥ अग्नेर्भस्मास्यग्नेः पुरीषम-
सि ॥ व्याघारशेषेण संभारान्तूष्णीमभिघारयति ॥ प्रदक्षिणमावृत्याग्निं गृहीत्वोत्तरवेदेः
पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्संभारेष्वग्निं प्रतिष्ठापयति ॥ यत्र प्रतिष्ठ सुमृतो लुभोवा आ- ॥२९॥
वसूनि पुरुधा विशन्तु ॥ दीर्घमायुर्यजमानाय कृण्वन्नथामृतेन जरितारमङ्ग्धि ॥ तूष्णीं

वा ॥ बोधि गोपामित्स्वगं ते होतुरवसानेऽध्वर्युरिध्मं विस्रस्य ज्वलयित्वा परिसमुह्य
पर्युक्ष्य परिस्तीर्य यजमानान्वारब्धो पूर्वाज्येन सकृद्गृहीतेन चतुर्गृहीतेन वा जुहो-
ति ॥ अग्निर्युक्तं नयतु प्रजानन्निमं नयतु रूपो विद्वान् ॥ देवेभ्यः प्रब्रूताद्युक्तं प्रप्रयुक्तं पतिं
स्वाहा ॥ अग्नये यज्ञपतय इदं ॥ अध्व० पुनर्गृहीत्वा जुहोति ॥ वायुर्युक्तं नयतु प्र-
जानन्० ॥ सूर्याय यज्ञपतय इदं ॥ वायवे यज्ञपतय इदं ॥ अ० पुनर्गृहीत्वाजु० ॥ सूर्यो यु-
क्तं नयतु प्रजानन्० ॥ * उपर ॥०॥ अ० पुनर्गृहीत्वाजु० ॥ यज्ञो युक्तं नयतु० ॥ यज्ञाय यज्ञ-
पतय इदं ॥ ततो यजमानः स्वयं सकृद्गृहीतेन जुहोति ॥ अग्निरन्नादोऽन्नपति-
रन्नस्येशः स मेऽन्नं ददातु स्वाहा ॥ अग्नयेऽन्नादायेदं ॥ पुनर्गृहीत्वाजु० ॥ वायुः प्राण-
दाः प्राणस्येशः स मे प्राणं ददातु स्वाहा ॥ वायवे प्राणदा इदं ॥ पुनर्गृहीत्वाजु० ॥ आदि-

स्रौ भूरिदा भूर्विष्ठानां पूष्णा नामी च्छ्रोम मे भूयिष्ठान्यभूर्न्दानुस्यात्॥ आदित्याय भूरिदद्वं॥
स्थाता पिपाश्रुक्यावेरः पश्चाद्दक्षिणतो गत्वाहव्योर्वेद्यो र्मध्येन प्राग्गत्वा प्रदक्षिणमावृ
त्य प्रत्यङ्मुख स्तिष्ठन्नध्वर्युणा स्थाग्नौ प्रतिष्ठापिते स्त्रुवेदिपूर्वार्द्धे स्थाग्निं प्रतिष्ठापये
त्॥ ब्रह्मणा स्त्रुक्समार्ष्टो निरसनादि जपान्ते यजमानो दक्षिण वेदिदक्षिणतः स्वस्था
ने स्थित्वा भूपत इति वदेत्॥ अथ स्थाता स्वमिध्मं विस्त्रस्य परिसमुह्य पर्युक्ष्य परिस्ती
र्य यजमानान्वारब्धो ध्वर्युर्वद्भुत स्त्र आकूती स्त्रू च्यौ जुहोति॥ अध्वर्यावाकूतिप्रि वतच्या
जमानं॥ उपयमनं वेद्यं तरालेनिक्षिपत॥ अध्वर्युरेव ब्रह्मन्नुत्तरौ परिग्राहौ परिग्र
हीष्यावदूति॥ ब्रह्म॥ ओं परिगृह्णीतं॥ उभौ परिग्राहौ मंत्रावृत्त्या कुरुतः॥ तिर्यंचौ स्फ्यो ॥२०॥
त्तब्धातिष्ठतः॥ अध्वर्युरेवाह॥ प्रोक्षणीरासादयतमिध्माबर्हिरुपसादयतं स्रु

वौ च स्रुचश्च कर्द्धं सौ च संमृष्टं पत्नीं संनह्याज्याभ्यां च दध्ना चो देतमिति॥ आग्नी
ध्रः॥ अग्रेण गार्हपत्य स्थिताः प्रोक्षणीः स्त्रु प्रोक्षण्यापूरणार्थमागतस्थाकुर्दक्षिणे
न हृत्वोत्तरवेद्यां स्फ्यस्य वर्त्मनि सादयति॥ दक्षिणस्यां प्रैषार्थकर्त्तास्थातेव॥ उत्तर
वेदिमग्रेणपाश्रुवंधिक्कीमपरेणवानत्संचारः॥ अग्नी देवपत्नीं संनह्य तयो नयो
राज्यावेक्षणे मंत्रावृत्त्या कृते आज्यदधिनी गार्हपत्ये धिश्रित्य प्रकृतिवदध्वर्यवे प्र
यच्छति॥ स्थातापि तद्वत्कृत्वा स्त्रुवेद्यामासादयति॥ यजमानो वेदिसंधौ प्राङ्मुखउ
पविश्य क्रमेण दक्षिणोत्तराज्ये मंत्रावृत्त्यावेक्षेत॥ ततोध्वर्युर्वैश्वदेववत्॥ स्थातार
र्वदिनियुगपदाज्यानि गृह्णीतः॥ यजमानः स्वस्थानस्थो युगपदनुमंत्रयते॥
पंचानां वोतानां यंत्राय धर्त्राय गृह्णामि॥ पंचानां वा भूतानां॥ पंचानां वो दिशां॥
वा

पंचानां वा पंचजनानां ॥४॥ चरोर्वां ॥ ब्रह्मणो वां तेजसे ॥ क्षत्रस्य वामोजसे ॥ विशो वां वी-
र्याय ॥ सुवीर्याय वां ॥ सुप्रजास्त्वाय वां ॥ ॥ रायस्पोषाय वां ॥ ब्रह्मवर्चसाय वां ॥८॥ भू-
तस्माकं ॥ हविषी देवानां ॥ आशिषो यजमानस्य ॥ देवानां वां देवताभ्यो गृ॰ ॥ कामाय वां
गृ॰ ॥ अध्वर्युः पंचविधं स्थाता त्रिविधं बर्हिः स्तृणाति ॥ परिधीननुमंत्रणे ॥ ध्रुवौ स्थो ध्रु-
वौ रुह्यं स्त॰ ॥ नृम्णौ स्थो नृम्णौ रुह्यं स्त॰ ॥ अग्निजुवौ स्थोऽग्निभू रुह्यं स्त॰ ॥ युनज्मि वां ब्रह्मणा
जातवेदसौ ॥ इंद्रं नावा हूं स्तु प्रभु यं वां ॥ आज्यस्थास्याप्यासादयो नौ गार्हपत्यस्य पश्चा-
दुपविशतः ॥ दक्षिणोध्वर्युरुत्तरतः स्थाता ॥ ततः स्थाता मारुतीमनभिघारितां स्वस्था-
ने धिष्ण्यस्य हविषां पुरस्तान्नीत्वा तद्दक्षिणतः स्थापयेत् ॥ अध्वर्युः स्योनं तद्यादिना ॥२१॥
त्रिरुद्धृत्य पात्र्यां सकृद्दाशयपात्रे चोपस्तीर्य ऐंद्राग्नेनानुद्वासयति ॥ ततः स्थाता मारुती-

यथावत्पुनरधिष्ण्यस्य तूष्णीं चमसमुपस्तीर्य तामभिघार्योद्वास्यैकदेशं वृश्चत-
त्रमेवीं निधाय तदग्रे ॰॰॰ शमीपर्णानि करीरसक्तूनामिक्षास्तोकं च निरवशेषं नि-
धाय वाजिनमानीयाभिघार्य लिं करोति ॥ यस्ते आसा पश्चषु प्रविष्टो मह्यं ॥ ततोध्वर्युः
स्वामिक्षां स्थाने धिष्ण्यस्य तूष्णीं चमसमुपस्तीर्य वारुणीमभिधार्योद्वास्य तदेकदेशं वृश्च-
स्य तत्र मेषादि निधाय साय सावशेषमामिक्षास्तोकं निधाय वाजिनमानीयाभिघा-
र्य लिं कृत्स्यैककपालमुद्वासयति ॥ वारुणीं निष्क्रामसमवभृथार्थं स्थापयति ॥ ऐंद्राग्नां
तान्युत्तरवेद्यामासाद्य स्थात्रासमेक्षणमारुत्यामुत्तरवेदेः पुरस्तादाहरणपूर्वकं स-
वेद्यामासादितायां वारुणीं समेक्षणामेककपालं चासादयति ॥ यजमानः आसा-
दनक्रमेणाभिमंत्रयते ॥ वाजिनासादनमंथने वैश्वदेववत् ॥ अध्वर्युरवेधामाससमि-

भमादधान आह॥ अग्निभ्यां समिध्यमानाभ्यामनुब्रूहि॥ उभौ सह प्राधत्तः॥ अग्निभ्यामिदं
॥इध्मावाधीयमानावनुमंत्रयते॥ उद्बुध्यस्वाग्नीयजमानायस्त्वं निर्मथ्यावजिह्वा सत्व॥ अ
ग्नीदेवैर्हुतोमन्द्रिहोमंद्रजिह्वो॥ तथैवाघारावनुमंत्रयते॥ मनसी स्रुचः प्राजापत्ये मनसा
मा भूतेनाविशतं॥ अध्वर्युः अग्नीत्परिधींश्चाग्निं च त्रिस्त्रिः संमृड्ढि॥ आग्नीध्रः उत्त
रपरिधिसंमार्गं दक्षिणप रिधिसंमार्गं चकृत्वोत्तराग्निसंमार्गं करोति॥ न दक्षिणस्य
॥स्थाता असंमृष्टे दक्षिणे गोत्रस्थानस्थो पत्नीं पृच्छति॥ पत्नि कस्ते जार इति॥ पाप्मा मे
जार इति॥ स्थाता॥ तं वरुणो गृह्णात्विति॥ करंभ पात्राणि शूर्पे निधाय पत्न्यै प्रयच्छति
॥तां शिरसि किंचिन्निधाय तदुपरि धृतं शूर्पं दक्षिणेनान्वाहार्यपचनं दक्षिणेन वे ॥२३॥
दी परीत्य प्राचीमुदानयन्वाचयति॥ प्रघास्यान्हवामहे मरुतो यज्ञवाहसः॥ करंभेण

सजोषसः॥ अध्वर्युरुत्तरमार्गेणागत्य दक्षिणस्याग्नेः पुरस्तात्प्रत्यङ्मुखस्तिष्ठेत्॥
तथैव तद्दक्षिणतो यजमानः॥ दक्षिणतः पत्नी॥ यजमानः शिरसि किंचिं निधाय पत्नी
हस्तात् शूर्पं गृहीत्वा स्वशिरसि निधाय प्रधावां पुरोनुवाक्यामन्वाह॥ मो षूणइंद्र पृत्सु
देवास्तु स्म ते शुष्मिन्नवया॥ महीह्यस्य मीढुषो यव्या हविष्मतो मरुतो वंदते गीः॥ अ
थ पत्नीयजमानाध्वर्यवो याज्यां वदेयुः॥ यद्ग्रामे यदरण्ये यत्सभायां यदिंद्रिये॥ यच्छू
द्रे यदर्य एनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि स्वाहेति तद्दक्षि
णकुर्यात्॥ शूर्पमनु प्रहरेत्॥ यजमानं वरुणायेदं॥ अध्वर्युः पृष्टगच्छतः स्थेनरा
ननु मंत्रयते॥ अक्रन्कर्म कर्मकृतः सह वाचा मयोभुवा॥ देवेभ्यः कर्म कृत्वास्तं प्रे
त सुदानवः॥ ततः स्थाता दक्षिणाग्निसंमार्ष्टि॥ अग्नेर्वाजजिदिति॥ त्रुवन्नमसीत्या

दितुल्यमुभयोः॥ पत्नीमानः स्रौच्याघारे प्रतिप्रस्थातारं करेणाविशतं॥ अध्वर्युर्दक्षि
णान्वारब्धे॥ युगपदनुमंत्रयते॥ वाचौ स्त्रुपं डेथोर्मे पल्लक्षयं ण्यो वा वामं दक्षिणावि
शतं॥ अध्वर्युरेव प्रवरं वृणीते॥ घृतवतीशब्दश्रवणेन नावत्याक्रम्य तिष्ठतः॥ अध्व
र्युरेवाश्रावणादि॥ स्थातुः क्रियामात्रं॥ चतुर्थादिष्वयोः समानयमानोध्वर्युरष्टमे सर्वं
समानयते॥ अर्धं स्थाता॥ वैश्वदेववन्नवप्रयाजानिष्ट्वाध्वर्युरैंद्राग्नंतान्यभिघारय
ति॥ ततः स्थाता ध्रुवामिक्षोपभृतः॥ अथाध्वर्युर्वारुण्यैककपालघृतदाज्यानि॥ उत्त
वाज्यभागौ यजतः॥ ततः स्थातोपरमति॥ अध्वर्युरैंद्राग्नंतान्यति॥ ततः स्थाताजुह्वामु
पस्तीर्य मरुद्भ्योनुब्रूहीति॥ शमीपर्णकरीरसक्तामिक्षास्तोकानामर्धमादाय द्वितीया २३
वदानेनावशिष्टं तदर्धमामिक्षांशे षष्यित्वावदाय मेषीं च सर्वामवदाय अभिघार्य तूष्णीं

अन्नादी

मत्यभिघार्यात्याक्रम्याश्राव्याग्नीध्रेण स्वस्थानस्थेन प्रत्याश्राविते मरुतो यजेति वषट्कृते
जुहोति॥ प॰ मरुद्भ्य इदं॥ मरुतामहं देवयज्ययाग्राव्यौर्ध्यासं॥ स्थातोपरमति॥ अ
ध्वर्युर्वारुणीं मारुतीवज्जुहोति॥ मेषीस्थाने मेषः इति विशेषः॥ प॰ वरुणायेदं॥ वरुणस्या
हं देवयज्यया धर्मनाग्भूयासं॥ एककपालयागांते॥ पज॰॥ कायेदं॥ कस्याहं देवशाति
ष्ठो भूयासं॥ सर्वं स्वाव्येण होमः॥ उपहोमपक्षे॥ नभश्च स्वाहा॥ नभस इदं॥ नभस्य
श्च स्वाहा॥ नभस्यायेदं॥ इषश्च स्वाहा॥ इषायेदं॥ ऊर्जश्च स्वाहा॥ ऊर्जायेदं॥ इ
त्याकृतयः॥ अध्वर्युर्जुह्वामुपस्तीर्य अग्नये स्विष्टकृतेनुब्रूहीत्यैंद्राग्नंतानाम
वद्यात॥ ततः स्थाताजुह्वामुपस्तीर्य मारुतीमवदाय द्विरभिघारयति॥ ततोध्वर्यु
र्वारुणीमवदायाशयाञ्चावदाय द्विरभिघारयति॥ स्वमेषस्यान्यादायात्याक्रम्यय

गां तेस्व मेक्षणान्यनुप्रहरति॥ होतुर्नमेक्षणादानानुप्रहरणे॥ अध्वर्युरेवप्राशित्र
मवद्यति॥ इडापात्र्यामुपस्तीर्यैंद्राग्नांतान्यवदायेडापात्रं होत्रे प्रयच्छति॥ समारुती
मवदायाग्निघार्याध्वर्यवे प्रयच्छति॥ सवारुण्यैककपालयोरवदाय मारुतीवर्जमग्नि
घार्य होत्रे प्रयच्छति॥ होताप्यन्वारब्धो॥ उपहूतायाम्नौ भूताम्॥ चतुर्धाकरण
मध्वर्युर्येरिव॥ नक्षे होतानम्भः॥ उपहूतयोः स्वांस्वाम संसृष्टाम ध्वर्युः प्राश्नीता
ऽतरे सर्वं संसृज्य प्राश्नंतीति भूर्त्तः॥ द्वादशगवाः सान्वाहार्यं ददाति॥ वाजिनासार
नादि वैश्वदेववत्॥ ब्रह्मन्प्र०ग्नीत्समिधौ॥ श्वाग्निं च सकृत्संमृड्ढ॥०॥ अग्नीदुत्त
रः करोति॥ दक्षिणतः होता॥ एतदस्य कृतं तद्वेत्यं तं कुरुतः॥ उन्नौनवानुयाजानू ॥ जा ॥२४॥
जतः॥ अन्नौ वाजवतीभ्यां ष्टुक्ष्कचौयय्यग्व्यूहतः॥ तत्र दक्षिणतस्य उदस्योत्तरतउद

स्यति॥ अध्वर्युरेवाश्रावयति॥ इषितेस्य पिसंप्रेष्यति॥ उक्तिं तिवाचने ऐंद्राग्नांतम
ध्वर्युः॥ मरुतामरूमितिहोताकुः॥ वरुणस्यकस्येत्यध्वर्युः॥ सशाखापवित्रौ प्रस्तरा
कुन्नौ प्रहरतः॥ यजु॥ रोहितेन वामग्निर्देवतां गमयतु हरिभ्यां वामिंद्रो देवतां ग
मयतु एतशेन वायुः स्वर्येदेवतां गमयतु॥ अध्वर्युरेवाह॥ अग्नीदिति॥ सं आह॥
संवदेथां॥ अध्व० अगताम ग्नीत्॥ आ० अगतं॥ स० श्रावय॥ आ० श्रौषट्॥ अ
०रमेब्रूहि॥ आ० अनुप्रहरतं॥ परिध्यनुप्रहरणे॥ वितेमुंचामीत्याहोनोरुद्रौ
तव॥ पर्से विवांचाग्नि० धत्त मुस्मासु द्रविणं यच्च भद्रं प्रणौ ब्रूतं भागधां देवता
सु॥ अन्नौ तत्करेस्चस्वस्फ्ययोः स्रुग्भिमोकं कुरुतः॥ वाजिनयागे॥ उन्नावत्साक्षा
मतः॥ अध्वर्यरेवाश्रावयादि॥ उन्नौ यजतः॥ वैश्वदेववद्वाजिनयागे॥ होता

स्रुवपात्रशेषमध्वर्युपात्रे निक्षिपेत्॥ स्थालीपरुवेत्तनीयोनक्षणे चतुर्थः॥ अध्वर्यु
रेव पत्नीः संयाज्य दक्षिणाग्निकोजुहोति॥ तत्र स्रुचस्य स्थाल्यां शेषमग्रव्रश्चनयो
र्युगपदन्वाधानमिति विशेषः॥ युगपद्दुग्नौ वेदौ यजमानाय प्रदाय वाचयीत॥
वेदोसि वित्तिरसि वेदयकर्मणे स्थः करुणो स्थः क्रियासं सुनीस्थ सनितासो
सो स्थः सुनेयं वेदोस्त्वं वाजिनं॥ नपत्नीव्रतविसर्ग इति केचित्॥ आप्यायतामि
त्यादिप्रायश्चित्तहोमांतमुभयोः॥ यजमानो युगपदनुमंत्रयते॥ आप्यायेतांधु
वे घृतेन यज्ञं तरुधारे पृथिव्यो युक्ते अस्मिन्॥ अध्वर्युर्वेद्युदेव वत्समिस्त्य यज्ञोजु
कुर्यात्॥ प्रकृतिवदितरः॥ उत्तरवेद्यामेव प्रणीताविमोकः॥ ब्रह्मोपस्थानविष्णु ॥२५॥
क्रमव्रतविसर्गांतं॥ नव्रतविसर्ग इति केचित्॥ यज्ञं यज्ञविमोकांते उपवेशोयुग

पदुल्करे उपगूहेत्॥ यो देवामनुष्येषूपवेषावधारयन्॥ ये अस्मद्पचेतसस्तानस्म
भ्यमिहाकुरुते॥ उपवेषावुपविष्टन्नः प्रजां पुष्टिमथो धनं॥ द्विपदोनश्चतुष्पदोधु
वाननपगान्कुरुतं॥ ॥ अथाव्वन्ध ॥ ॥ पक्षेयजमानस्य पस्वितीदित्या युत्तरेग्नौ
तग्रहणं कुर्यात्॥ ततोध्वर्युस्तव्याीस्त्समिद्माहाय दर्भमुष्टिं वेदं च कृत्वा कर्मणे वामि
त्यादियाणीसं मद्र्यगार्हपत्योत्तरवेदिकोसर्वान्वा परिस्तीर्य पात्रकवेद्यांतरेणोप
स्थमग्निहोत्रहवणीं जुहूं स्रुवमाज्यस्थालीं वेदं मुद्गरणस्थालीयोक्त्रं वेदपरिवा
सनं च हृद्वा यथोत्तरणं चेत्यासादयेत्तरवेदिसमीपेत्॥ ब्रह्माणं यजमानं चोपवे
श्य गार्हपत्यादोत्तरवेदिकांतं॥ यज्ञस्येति दशभिः स्तृणाति॥ इमौ प्राणापानाविति
पवित्रे कृत्वा यजमानं वाचंयच्छे स्फस्कावेणाय स्वेस्यग्निहोत्रहवणीमादाय प्रस्फ

मिति निधाय ॥ प्रकृतिवत्प्रोक्षणीः संस्कृत्य तन्निधाय तानि पात्राणि प्रोक्षति ॥ शुंधध्व
मिति ॥ महीनाभित्याज्यं निरूप्य गार्हपत्येधिश्रित्य तन्निधाय संपर्यग्निकृत्य तत्र्यांश्च स्फ्यमा
दाय वेद्यां निधेयं स्त्रुवा स्तंभैः समाहृ ॥ प्रोक्षणीरासादय स्रुवं च स्रुचं च संमृड्ढि पत्नीं
संनह्याज्येनोदेहीति ॥ योमा हरेति स्फ्यमुदस्यति ॥ अग्नीधः पात्रे प्रैषं सर्वं करोति ॥
प्रत्युष्टं रक्षः ॥ अग्नेर्वांतेजिष्ठेन तेजसा निष्टपामीति विशोष्य ॥ अध्वर्युराज्यमसी
त्यादि यजमानमाज्यमवेक्षयित्वा ॥ अग्नेर्जिह्वासीति स्रुचमवेक्ष्य ॥ शुक्रमसीति स्फ
त्रूंय ॥ स्वधा पितृभ्य ऊर्ग्भवेति स्तपवित्रं प्रोक्षणीर्निनयनांतं ॥ विश्वावसि वैश्रुवं
धामासि प्राजापत्यमसीत्याज्यमभिमंत्र्य निधाय संगार्हपत्येधिश्रित्य स्रुचमुद्धरणपात्रे कृ ॥२८॥
त्वामनुपस्तीर्यते स्मिन्निधाय स्रुक्कृत्वा निधाय सान्नाय्यवदन्तं कृत्य यस्त्व आत्मेति

वेद्यामासादयति ॥ भूर्भुवः स्वरिति ॥ यजमानेनासंनाभिमंत्रणे कृते ॥ आज्यस्थालीं
सस्रुवां जुहूं बर्हिर्वेदं च वेदं वासस्तीवाक्षणी निधाय संनुवांश्चेत्याहायति छाति ॥ परिकर्मी स्फ्यं
परिभोजनीयं दर्भान्समिधमादायास्ते ॥ अध्वर्युराह ॥ एहि यजमान ॥ अंतरेण चात्वा
लोत्करौ यजमानपत्नीन्यांसस्रुवस्ते पुदङ्ः निष्क्रामंति ॥ उरुं हि राजा वरुणश्चका
र सूर्याय पंथामन्वेतवा उ ॥ अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित् ॥
॥ अपां तीरं गच्छंति ॥ लोहस्त्रायजमानं वाचयति ॥ शतं ते राजन्भिषजः सहस्रमुर्वी गंभी
रा सुमतिष्टे अस्तु ॥ बाधस्व द्वेषो निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् ॥ अपां
समीपमधिनिछंति ॥ अभिष्ठितो वरुणस्य पाशः ॥ अग्नेवंतन्यार्यायां दिशं गताः सेवत
न्प्राचीनमनुतिष्ठंत एवं प्रचरेति ॥ अध्वर्युः अप्रक्षबर्हिः प्रास्यति ॥ अग्नेरनीकमप

आविवेश॥ अपां नपात्प्रतिरक्षन्नसुर्यं॥ इमं इमे समिधं यस्याग्ने॥ बर्हिरपास्य चरूस्ता तु
कारं संबध्य परिस्तीर्य तस्मिन्नाधाय खल्कवाकुतिं करोति॥ प्रति निधाय घृतमुद्धर
त्येषस्या रा॥ य० अग्नयद्रुदं॥ होतारं प्र विष्टे॥ अग्नीदर्भः स्रिः संमृड्ढि॥ स्तपरि नीज
य इन्दो न्यस्येनोपसंगृह्य पश्रिः संमार्ष्टि॥ अपो वाजजितो वाजं वः आर्पः सद्रिव्यं तीवा
जं जेष्यं तीर्वाजिनी वाज जितो वाजमित्याभ्यां संमाज्य पो अंनादा अंनाद्याय॥ जूपां पश्चा
त्कश्चि निष्ठन्न आज्यस्थालीं निधाय संचाददते॥ अध्वर्युस्तद्दुरकृति धन्नेव॥ वेदमुप
न्तं कृत्वा जुह्वोश्वकं स्वेति चतुर्गृहीतं गृह्णाति॥ य०॥ निष्ठन्तेवपं चानां स्वेतिप्र
कृतिवदनुमंत्रयते॥ अध्वर्युरत्याक्रम्य प्रकृतिवत्त्रीन्प्रयाजान्यजति॥ न यैवानु ॥२९॥
मंत्रणं॥ अध्वर्युः प्रत्याक्रम्य ज्योतिस्त्वेति चतुर्गृह्णाति॥ चरोस्त्वे त्यादि विभेत्वेतां

तं यानमानं॥ अध्वर्युः अत्याक्रम्य यंच ममिष्ट्वा॥ यजमानेन प्रकृतिवदनुमंत्रितं॥ प्र
त्याक्रम्य प्रयाजशेषेणाज्यस्थालीं निधाय संचाभिघार्य पुनराज्यस्थालीमभिघारयति॥
अर्चिस्त्वेति जुह्वामुपस्तीर्य यजमानेन भूरस्माकमित्यक्ते॥ अग्नये ऽनुब्रूहीति स्रुचा
पुनरर्चिस्त्वेति त्रिर्गृह्णाति॥ यजमानः हविर्देवानामित्यादि त्रिभिरनुमंत्रयते॥ अध्व
र्युः अत्याक्रम्याश्राव्य प्रत्याश्रावितेऽग्निं यजेति॥ एवमेव सोममिष्ट्वा सर्वप्रायश्चित्तं कृ
त्वा॥ अर्चिस्त्वेति जुह्वामुपस्तीर्य॥ भूरस्माकमित्यक्ते निधायासादयंश्च॥ वरुणायानु
ब्रूहीति॥ त्रिरसकृदर्चिस्त्वेत्यभिघारयति॥ हविर्देवानामिति यजमानः॥ अध्वर्युः अत्याक्र
म्य वरुणं यजेति॥ य० वरुणायेदं॥ वरुण्यस्यारुद्रं दैवयुज्यया धर्मणा गृभ्णामि॥ प्रयाज
नानावान्तरस्कवकृती॥ पुनरर्चिस्त्वेत्युपस्तरणानि॥ भूरस्माकमित्यक्ते॥ अग्नीवरुणा

स्याम नु कूर्द इति॥ सर्वनिष्कासं सस्तकृ स्वदाय द्विरभिघारयत्यर्चिस्स्त्वेति॥ य॰ हविर्देवा
नो आशिषो यजमानस्य॥ यागांते अग्नीवरुणाभ्यामिदं॰ अग्नीवरुणयोरहं देवय
ज्ययायुष्मान्यज्ञेन॥ अध्वर्युः परिधिस्थलमुद्दिश्य प्रकृतिवत्संक्षालनं निनयति॥
अयाह॥ ब्रह्मन्प्रस्थास्यामोग्नीदपः सक्तुसंमृड्ढि॥ ब्रह्मा॥ प्रकृतिवत्प्रस्थोनि॥ अग्नी
त्समुदं धनदेनैरपः सक्तुसंमार्ष्टि॥ आपो वाजजितो वाजं वः आपः सस्तुवीर्वाजजि
यु वीर्वाजिजिनं वाजिजितो वाजजित्यायै संमार्ज्म्यपो अनाद्यायानाद्यायै॥ अथ ज्योति
स्त्विति चतुर्गृहीतं गृह्णाति॥ स्रुवीर्यमित्वेत्यादि चतुर्नि यजमानोनुमंत्रयते॥ अध्वर्युः
प्रत्याक्रम्य॥ देवो यजेति यजे स्फचरं॥ यजमानं प्रस्तिद्दं॥ प्रत्याक्रम्याफ्फ स्फचं प्र ॥२९॥
तिष्ठापयति॥ समुद्रे ते हृदयमप्स्वंतः॥ स्फचमद्भिः पात्रांतरेण प्लावयति॥ संत्वावि

शंत्वोषधीरुतापः॥ अभ्यवयो जुहोति॥ यज्ञस्यत्वा यज्ञपते हविर्भिः सूक्तवाकेन नमोवाके
विधेम स्वाहा॥ य॰ यज्ञपत यद्दं॰॥ अध्वर्युर्निष्कासस्थालीमप्सु क्षिपेत्॥ यजमानोंजलि
नापो गृह्णाति॥ सुमित्रान आप ओषधयः संतु॥ नैर्ऋतिं निरस्यति॥ दुर्मित्रास्तस्मै भूयासु
र्योस्मान्द्वेष्टि यं च वयं द्विष्मः॥ यजमानः सर्वे वा स्रुक्कुशान्विकिरंति॥ यजमानो बिंदू
नुपस्पृशति॥ इति नाभ्रत्वामुंचामीति॥ पत्न्या योक्त्रं विमुंचति॥ सर्वेभ्यं स्वं पादमुदकों
ते निदध्युः॥ नमो वरुणायाभिष्ठितो वरुणस्य पाशः॥ उपविश्याऽपः पिबंति॥ नुक्षस्या
वंनयोसि॥ गुग्गुलीकृत्य निष्ठीवंति॥ अध्वर्युर्माचम्य पुनः पिबंति॥ नुक्षितस्यावच्च
योसि॥ प्रोष्य गिलंति॥ अध्वर्युमाचम्य॥ पुनर्गृहीत्वा गिलंति॥ नुक्षंकृत
स्याव भयोसि॥ द्विराचम्य स्नाति॥ आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः

पुनंतु॥विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमि॥इदमापःप्रवहत॰न
तं॥सुमित्र्यानआपओषधयःसंतु॥दुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः
॥पत्नीयजमानावन्योन्यस्यपृष्ठेधावतः॥अमज्जंतस्नातः॥नवेवाससीपरिधा
=दशाने यपूर्वेदेहतः॥सर्वेजलादुत्तीर्यादित्यमुपतिष्ठंते॥उद्वयंतमसस्परिज्योतिष्पश्यं
तउत्तरंम्॥देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं॥वाससीपरिधायदंपतीवहतः
॥प्रतिप्रस्थानरुन्नोनयेति॥ततयोर्हस्तौगृहीत्वोदानयति॥उद्वयंतमसस्परि
पश्यंतोज्योतिरुत्तरं॥देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं॥उदुत्यंजातवेदसंदेवंवहंति
केतवः॥दृशेविश्वायसूर्यं॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥आ ॥२९॥
प्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥इतितिसृभिःयजमानउत्त
स्त

रत्नग्रपदेनापत्नीरंप्रतिप्रेरयति॥प्रतियुतोवरुणस्यपाशःप्रत्यस्तोवरुणस्यपाशा
इति॥यजमानोप्युत्तीर्यब्रूयात्॥उद्वयं॰ज्योतिष्पश्यंत॰देवंदेव॰रुत्तमं॥सर्वेतीर्थमन
वेक्षमाणाः॥परस्परमस्पृशंतोदेवयजनंप्रत्याव्रजंतः प्रत्येकंतिस्रस्तिस्रःसमिधोगृ
ह्णंति॥अग्नेःसमिदसितेजोसितेजोमेदेहि॥इतिप्रथमां॥एधोस्येधिषीमहि॥इतिद्विती
यां॥समिदसिसमेधिषीमहि॥इतितृतीयां॥एवंक्रमेणगृहीत्वाप्रत्येत्याहवनीयंप्र
त्यगृहकल्पित्वातमुपतिष्ठंते॥आपोअद्यान्वर्चसेतिसर्वेषामुपस्थानेसमाप्तेयो
यःपूर्वंगृह्णीयात्तस्यपूर्वमादध्यात्॥अग्नेःसमिदसितेजोसितेजोमेदाःस्वाहा॥
सोमस्यसमिदसिदुरिष्टेर्मापाहिस्वाहा॥पितॄणांसमिदसिमृत्योर्मापाहिस्वाहा॥स
र्वत्राग्नयइदं॥पत्न्यास्तूष्णींगृह्याहोमौ॥सर्वेसंस्थाजपेनोपतिष्ठंते॥ततोयजमा

नः पयस्वतीरित्याद्युत्तरेणैद्वनविसर्गेनिं कुर्यात्॥ उत्तराग्निसमारोपणपूर्णाहुतीकु
र्यान्नवा॥ पश्चेध्वर्युर्यजमानान्वारब्ध औत्तरवेदिकमग्निं शाकले समारोपयति॥ अयं ते
योनिः ० आरोहाथानो वर्धया रयिं॥ तच्छकलं शालामुखीये न्यादधाति॥ आजुह्वानः
८ सुप्रतीकः पुरस्तादग्ने स्वां योनिमासीद साध्या॥ अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे
देवा यजमानश्च सीदत॥ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते संसृजेथामयं च॥
पितरं पुनः कृण्वꣳस्त्वा युवानमन्वाताꣳसीत्त्वयि तंतुमेतं॥ इति मध्यमाग्निमुपसमाधाय पूर्व
णेन स्रुचि चतुर्गृहीतेन स्रुचं पूरयित्वा कौंचित्समिधमाधाय परिषिच्य जुहोति॥ सप्त ते
अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि॥ सप्त होत्राः सप्तधा त्वा यजंति
सप्त[illegible]योनीरापृणस्वा घृतेन स्वाहा॥ अग्नये सप्तवत इदं॥ वरमध्वर्यवे ददाति ॥३०॥

पुनराधेयंजपादि ब्राह्मणतर्पणांते निवर्तनादि वैश्वदेववत्॥ मंत्रे विशेषः॥ यद्भूर्भः पुर्व
वर्तयत्॥ अंतान्पृथिव्या दिवः॥ अग्निरीशान ओजसा॥ वरुणो धीतिभिः सह॥ इंद्रो मरु
द्भिः सखिभिः सह॥ अग्निस्तिग्मेनेत्यादि समानं॥ निवर्तनोपवाप्यनूमश्रूण्येव वापयी
त न केशानि निशालीकिः॥ निवर्तनेनोपवाप्यनेव श्मश्रूणि वापयीत न केशानि त्यो
पमन्यव इति हैष॥ मध्यमयोः पर्वणोर्यद्यपि केशवापनं न क्रियते तथापि श्मश्रुवाप
नं कर्तव्यमिति सिद्धांतनाथ्ये॥ नोनयवापनं मध्यमयोरिति हरिहरदेवयाज्ञिको॥ अंते॥
परिवत्सरीणां स्वस्तिमाशास्त इति वदेत्॥ ॥ संतिष्ठते वरुणप्रघासपर्व॥ ॥
॥ अथ साकमेधपर्व॥ ॥ तस्याद्येष्टिर्यथोदयं प्रधानयागो न वति तथा कार्या॥ अ
परराह्णे गार्हपत्याग्निहोत्रमपक्षय्य कृत्वा॥ याः पुरस्तादित्यादि साकमेधहवि

निर्वपस्थे ॥ ओंनयेत्यंते ॥ पुनर्याः पुरस्तादित्यादि० अनीकवद्धविर्वापस्थे ॥ अनीकवत्संबं
धिहविः ॥ व्रीहिमयः पु० ॥ अग्निरनीकवान्प्रधानदेवता ॥ अग्निः स्विष्टकृदित्यादि ॥ अग्नि
विहरणान्वाधानादि ॥ पंचदश सामिधेन्यः ॥ अग्नयेनीकवतेजुष्टंनिर्वपामि ॥ एवं प्रोक्ष
णादि ॥ अष्टौकपालानि ॥ वार्त्रघ्नावाज्यभागौ ॥ अग्नेरनीकवतोहंदेवयज्ययान्नादोभूया
स्वो०५ सं ॥ अन्वाहार्यमासाद्यर्त्विग्भ्योददाति ॥ अग्नेरनीकवतोहमुज्जितिं ॥ समानमन्यत्संतिष्ठते
॥ ब्राह्मणतर्पणांतेष्टिः ॥ ॥ मध्यंदिनेप्यप्रधानयागोनवतितया सांतपनेष्टिः कार्या ॥
तस्यां याः पुरस्तादित्यादि ॥ मारुत्सांतपनेनहविर्वापस्थे ॥ मारुत्सांतपनसंबंधिहविः ॥
व्रीहिमयश्चरुः ॥ मरुतः सांतपनाः प्रधानदेवता ॥ अग्निः स्विष्टकृदित्यादि ॥ पंचदश ॥३२॥
सामिधेन्यः ॥ कपालपिष्टोद्वपनीमदंतीदृषदुपलशम्यावर्जयित्वा ॥ चरुस्थालीमेस

तान्यां सरूपात्राण्यासादयेत् ॥ मरुद्भ्यः सांतपनेभ्योजुष्टंनिर्वपामि ॥ चरुधर्माः प्रसि
द्धाः ॥ वृधन्वंतावाज्यभागौ ॥ मरुतांहं सांतपनानामहं० प्राणैर्धासं ॥ अन्वाहार्यमा
साद्यर्त्विग्भ्योददाति ॥ मरुतांहं सांतपनानामहमुज्जितिं ॥ सममन्यत् ॥ संतिष्ठतेब्रा
ह्मणतर्पणांतेष्टिः ॥ ॥ अथगृहमेधीयेष्टिः प्रयोगः ॥ अपराह्णे यजमानः ॥ याः पुरस्ता
दित्यादि गृहमेधीयहविर्वापस्थे ॥ ओंनयेत्यंते ॥ गृहमेधीयंहविः ॥ व्रीहिमयश्चरुः ॥
आग्नीषोमावाज्यभागौ ॥ मरुतोगृहमेधिनः प्रधानदेवता ॥ अग्निः स्विष्टकृत् ॥ एव
मात्मकेनेत्यादिपत्न्याइत्यंते ॥ तूष्णींदर्भैर्वत्सानपाकृत्याग्निहोत्रार्थमग्नीन्विहृत्या
न्वाधानादिव्रतांते ॥ अध्वर्युः ॥ देवस्यत्वेत्यसिमादाय ॥ अभिमंत्र्य प्रत्युष्टमितिनिष्ट
प्य तूष्णीं परिभोजनीयां वेदं च कृत्वा कर्मयोग्यामितिपाणी संमृश्य परिस्तीर्य गार्हपत्य

स्य पुरस्तात्॥ स्फ्यं चरुस्थालीमेक्षणमग्निहोत्रहवणीं शूर्पं कृष्णाजिनं शम्यामुलूखल
मुसलं दृषदुपलं स्रुवं ध्रुवामिडापात्रं प्रणीताप्रणयनमाज्यस्थाल्यौ वेदं दारुपात्री
योक्त्रं वेदपरिवासनं धृष्टिमन्वाहार्यस्थालीमिति पात्राण्यासादयति॥ मंत्रेण ब्रह्मण
मनुमते यज्ञस्येति पृष्ट्वा ॐ स्तीर्णे वा ऽमंत्रके समंत्रके च पवित्रे कृत्वा ऽमंत्रकपवि
त्राभ्यामपः पयो वा प्रणयति॥ ब्रह्मन्नपः पयो वा प्रणेष्यामीति यजमानवाचं यच्छे
त्युक्त्वा॥ अनयापः पयो वा प्रणयानीति॥ वेषाय त्वेत्यग्निहोत्रहवणीमादाय प्रत्युष्ट
मिति निष्टप्य तूष्णीं दारुपात्रीं स्पृष्ट्वा व्रीहीन्प्रेक्ष्य तृणादि निरस्यापस्पृष्ट्वा ऽमंत्रकप
वित्रवता प्रोक्षणीपात्रेण चतुरो मुष्टीन्व्रीहीणां निर्वपति॥ देव॰हस्ताभ्यां मरु ॥३२॥
द्भ्यो गृहमेधिभ्यो जुष्टं निर्वपामि॥ इति त्रिर्यजुषा तूष्णीं चतुर्थं॥ अमंत्रकप्रोक्षणीः

संस्कृत्य समंत्रकस्य संस्कारश्च आपो देवीरित्यादि प्रोक्षितास्थेत्यंते॥ तूष्णीं प्रोक्षणीभिर्हविः
प्रधानपात्राणि च तूष्णीं प्रोक्षेत्॥ न चैताः परिशोषयेत्॥ तत्पवित्रे रक्षेत्॥ ततः समंत्रका
भिः शुंधध्वमिति अंगपात्राणि प्रोक्षेत्॥ ततस्तूष्णीमजिनावधूननादि प्रक्षालननिनय
नांतं कृत्वा कस्वांते सर्वावशिष्टगास्तूष्णीं होरुयित्वा चरुस्थाल्यां तिरःपवित्रमपः पयो
वानीय सौम्यवद्दधिश्रयणादि इति केशवः॥ तूष्णीं गार्हपत्येऽधिश्रित्य श्रपयेदित्यन्ये॥ उ
द्धनेन गार्हपत्यं तूष्णीं तिरःपवित्रमाज्यं निरूप्य गार्हपत्येऽधिश्रित्य चरुणा सह तूष्णीं
[illegible] पर्यग्निं कृत्वाज्यस्थाल्यां मंत्रेणाज्यं निरूप्याधिश्रित्य मंत्रेण पर्यग्निं कृत्वा दाहाना अग्निवे ३
दि समंत्रकं कुर्यात्॥ प्रोक्षणीरासादय स्फ्यं स्रुवं च स्रुक् चमसं संमृड्ढि पत्नीं संनह्याज्येनो
देहि॥ अग्नीत्पात्राणि त्रवर्जं पात्राणि संमृज्य॥ पत्नीं संनह्य पत्नीं तूष्णीमवेक्षितं मे

श्रेयावेक्षितमाज्यं च सहैव नयेत्॥ गार्हपत्याहवनीययोर्निधानमाज्यमसीत्यवेक्ष
णमुत्पवनं चाप्रधानाज्यस्य अर्चिस्त्वेति ध्रुवायां मंत्रवत्संस्कृतमाज्यं गृह्णामि॥ यु
भूरस्माकमित्यादि॥ अध्वर्युः आपो देवीरित्यादि प्रोक्षितास्थ इत्यंतं कृत्वा वेदिरसीति
वेदिं प्रोक्ष्य स्वधा पितृभ्य इति शेषं निनीयान्तूष्णीं परिभोजनीयदर्भैरेव विधृती वि
शोध्यं त्रे स्थ इति सादयित्वा तूष्णीं जुहूपभृतौ सादयति॥ मंत्रेण ध्रुवामासाद्यतामभि
मृशति॥ एषा सदत्सु कृतेन स्यं लोके तां विष्णो पाहि इति नियं॥ मंत्रवत्संस्कृताज्यस्था
लीं बर्हिष्यासाद्य तत्राज्यं ध्रौवाज्यं चाभिमंत्रयते॥ विष्णुर्नीस्थो वैष्णवे धामन्नी
स्थः प्राजापत्ये॥ स्थाल्यो स्रुवं पात्रीं चादाय गार्हपत्यस्य पश्चात् स्थित्वा अमं ॥२२॥
त्रकाज्येन तूष्णीं चरुमभिघार्येदं च मुद्धास्य पात्रीं निर्णिज्य तूष्णीमुपस्तीर्य

तस्यां चरुमन्वानयन् जुहूत्य स्थाल्यां शामकाषमव शोधयित्वा जुहूतस्य मध्ये गर्तं कृत्वा
अभिहृतमाज्यमानीय संस्कृताज्यपूर्णं स्रुवमानीय तूष्णीं वेद्यां चरुमासाद्य स्रुवं मंत्रेणा
सादयति॥ यजमानेन ध्रुवासंस्कृताज्ययोर्यन्मे अग्न इत्यभिमर्शनं क्रियते॥ होतरं तीय
त॥ नवेदेनोपवीजनं प्रयोजनाभावादिति रामांडारः॥ अग्नीदग्नीं त्रिः संमृड्ढि॥ आग्नी
ध्रः अग्ने वाजजिदित्यादिना त्रिरग्निं संमार्ष्टि॥ अध्वर्यु ध्रौवाज्यात्॥ प्रकृतिवत्॥ रयि
मंतावाज्यनागो कृत्वा संस्कृताज्येन प्रायश्चित्तं कृत्वा॥ असंस्कृताज्येन जुह्वामुपस्ती
र्य ज्रच्छै रुपांशु वा॥ मरुद्भ्यो गृहमेधिभ्योनुब्रूहीत्य स्त्वोयस्थानाभिमर्शनवर्जं पूर्वार्धा
ऽपरार्धाभ्यां चरोरवदाय तूष्णीं तेनैवाज्येनाभिघार्य प्रत्यभिघार्यं चात्याक्रम्या श्राव्य प्रत्या
श्राविते मरुतो गृहमेधिनो यजेत्यादि॥ यन्मरुद्भ्यो गृहमेधिभ्य इदं॥ मरुतां गृहमेधि

नोमहद्देवयज्यया प्राणैरूर्ध्वासं॥ स्विष्टकृदुपस्तरणादौ संस्कृताज्यमिडायां च॥ अंतः
परिध्यपांनिनयनादिमार्जनांतं प्रकृतिवत्॥ प्राशित्रयजमानभागं चतुर्धाकरणानि
नसंति॥ मार्जनांते ऽन्वाहार्यमासाद्य च तस्मै गां ददाति॥ योक्त्रविमोकादिसंस्थाज
पांतं होमः॥ पत्नीव्रतविसर्गांतं कृत्वा निष्क्रामेत्॥ ततोऽध्वर्युर्ध्रुवाप्यायनप्रायश्चि
त्तसमिद्यजुः प्रणीता निनयनांतं कुर्यात्॥ संस्थाजपांतं ब्रह्मापि॥ यजमानः कृ
त्वांते पयस्वतीरित्यादि व्रतविमोकं कृत्वात्मानं संप्रेष्यति॥ ब्राह्मणांश्च तर्पयित्वै
दूति॥ ॥संतिष्ठते गृहमेधीयेष्टिः॥ ॥अथ यजमानः क्षामकाषं परिशिष्य गृह
मेधीयं प्राश्नीयात्॥ अस्यामेव रात्रौ दक्षिणाग्नौ बक्षोदनं पक्त्वा यजमानस्य पत्नी ॥ ७४ ॥
कुमारादयः प्राश्नीयुः॥ सर्वे अंजनाभ्यंजनयोः स्पर्शनमवेक्षणं वा कुर्युः॥ ततोऽपर

रात्रेऽग्नीन्विहृत्य पयसाग्निहोत्रं कृत्वा गार्हपत्यं परिस्तीर्योत्तरतः स्तृणेषु सादय
ति॥ वैकंकतीं दर्वीं प्रोक्षणीः स्रुवमाज्यस्थालीं संमार्गार्थान् दर्भानिति॥ पवित्रे कृत्वा प्रो
क्षणीः संस्कृत्य सर्वाणि पात्राणि प्रोक्ष्याज्यं संस्कृत्य दर्वीं स्रुवौ निष्टप्य संमृज्य दर्व्या
मुपस्तीर्य क्षामकाषमवदाय द्विरभिघार्य गार्हपत्ये समिधमाधाय यजमानान्वारब्ध
स्तिष्ठन्नासीनो वा जुहोति॥ पूर्णा दर्वि परापत सुपूर्णा पुनरापत॥ वस्नेव विक्रीणा
वहा इषमूर्जं शतक्रतो देहि मे ददामि ते नि मे धेहि नि ते दधे॥ निहारमिन्निमे ह
रा निहारं निहरामि ते स्वाहा॥ ब्रह्मणा व्याहृतिपूर्वकोच्चारितनिहारकारेण समका
ले स्वाहाकारो यथा भवति तथा यजमानान्वारब्धो जुहुयात्॥ इदमिन्द्रायेदं॥ गार्ह
पत्यं परिषिच्य॥ ऋषभं ददाति॥ अध्वर्यवेऽयं तमृषभस्तं प्रतिगृह्णीवेति॥ अथ

युः देवस्य त्वा० रुद्राय गामिति प्रतिगृह्णीयात्॥ ॥अथ क्रीडिनीया॥ ॥यथासूर्योदि
ययागेभवति तथा कार्या॥ याः पुरस्तादित्यादि क्रीडिनीयं हविरायक्ष्ये॥ ओं तथेत्यु
ते॥ क्रीडिनीयं हविः॥ व्रीहिमयः पुरोडाशः पंच प्रयाजाः॥ अग्नीषोमावाज्यभागौ॥
मरुतः क्रीडिनः प्रधानदेवता॥ अग्निः स्विष्टकृदित्यादि विहृत्यान्वाधानादि पंचद
शसामिधेन्यः॥ पाणीसंमर्शनादि॥ मरुद्भ्यः क्रीडिभ्यो जुष्टं निर्वपामि॥ एवं प्रोक्षणा
दि॥ सप्तकपालानुपधायाज्यभागांते॥ मरुद्भ्यः क्रीडिभ्योनुब्रूहीत्यादि॥ मरुद्भ्यः क्री
डिभ्य इदं०॥ मरुतां क्रीडिनामहं देवयज्ययाह्वचरानूयासं॥ अन्वाहार्यमाद्य तिस्रो
गा ददाति॥ मरुतां क्रीडिनामहमुज्जितिं०॥ समममन्यत॥ ॥संतिष्ठते ब्राह्मणतर्पणां ३५
ते ष्टिः॥ ॥अथ तदानीमेव याः पुरस्तादित्यादि महाहविर्निर्वक्ष्ये॥ महाहविः संबं

धि हविः॥ व्रीहिमयः पुरोडाशो द्रव्यं॥ व्रीहिमयश्चरुः॥ नव प्रयाजाः॥ अग्नीषोमावाज्य
भागौ॥ अग्निः सोमः सविता सरस्वती पूषा इंद्राग्नी इंद्रो विश्वकर्मा इति प्रधानदेवताः॥
अग्निः स्विष्टकृन्नवानुयाजाः॥०॥ सद्योयक्ष्य इत्यंते॥ विहृत्यान्वाधानादि॥ सप्तद
शसामिधेन्यः॥ पंचविधं बर्हिः॥ औत्तरवेदिकान्संभारान् संभरति॥ अष्टात्रिंशत्क
पालानि॥ ४ चरुस्थालीस्तावंति मेक्षणानि कंसोपवेषवर्जं सर्वं वैश्वदेववत्॥ यथा
देवतं निरूप्य प्रोक्ष्य चर्वादीन्त्रिजत्वाऽग्निसवितृपूषेंद्राग्नीविश्वकर्मभ्योऽधिवपनं
॥ऐंद्राग्नकपालोपधानांतं वरुणप्रघासवत्॥ तत ऐंद्रचरवे स्थालीं विश्वकर्मण
एककपालमुपदधाति॥ अग्नीदितस्त्रिर्हरेत्यंते॥ याचति स्फ्यमुदपात्रं बर्हिरित्या
दिजुहूपरिग्रहांतं वरुणप्रघासवत्॥ प्रतिप्रस्थातुरत्नावान्नीहः॥ प्रेषप्रभृत्याज्यप

रुणपुरोडाशोद्वासनांतंवैश्वदेववत्॥[illegible]॥मंथनंच॥आज्यभागांतेऐंद्राग्नांतंव
रुणप्रघासवत्॥ततइंद्रायानुब्रूहीत्यादि॥यज०इंद्रायेदं०॥इंद्रस्याहंदेवयज्ययेंद्रियावी
भूयासं॥उपांशुविश्वकर्मयागांते॥यज०विश्वकर्मणइदं०॥विश्वकर्मणोहंदेवयज्य
याविश्वानिकर्माण्यवरुंधीय॥अध्वर्युःउपहोमपक्षे॥सहश्चसुस्वाहा॥सहस्यश्च
स्वाहा॥तपश्चसुस्वाहा॥तपस्यश्चसुस्वाहेतियथालिंगंत्यागः॥अन्वाहार्यमासाद्य१२ब्राह्
णागाददाति॥समिष्टयजुर्होमांतंवैश्वदेववत्॥बाहिर्नवर्जं॥नब्रह्मविसर्गः॥समारो
पादिवरदानांतंवरुणप्रघासवत्॥आपवर्गमात्रेत्रयस्तएवाग्नयः॥नविहरणं॥॥
संतिष्ठतेमहाहविः॥ ॥अथमहापितृयज्ञः॥ ॥तंकरिष्यन्नुपकल्पयते॥व्रीहींश्च ३६
यवांश्चाष्टौकपालानि॥अर्घपात्रप्रमाणंमृतवत्सायाःपयः॥नवपात्राणिपंच॥ने

=नूतन=

जनार्थंकपालं॥इक्षुशलाकां॥त्रीन्यजाशायीतान्पर्णत्रयसहितान्॥समूलंनिर्मूलंवा
बर्हिः॥तिर्यगूर्ध्वप्रमाणेनप्राकृतादधिकमिध्मं॥परिश्रयणंवासः॥कशिपूपबर्हणे॥
आंजनाभ्यंजने॥दशामाछादनंवासः॥अपूर्वंस्फ्यमुदकुंभौ॥योक्त्रवर्जं॥शूर्पध्ययुत
निस्फ्यादीनिति॥ ॥अथपैतृकविहारः॥ ॥चतुःस्रक्तिर्वेदिर्दक्षिणाहवनीयत॥
अथवादक्षिणाग्नेःस्यात्साचदक्षिणपूर्वतइतिगोपालः॥वेदिस्तुदक्षिणाग्नेःस्याद्दक्षि
णपूर्वकस्यवेतिकल्पः॥दक्षिणाग्नेःपुरस्तात्संचरमवशिष्यपुरुषमात्रांवेदिंकुर्वी
तीतितंत्रकृद्भवौ॥नत्वदक्षिणाग्नेर्दक्षिणतःपुरस्ताद्वामध्यशंकोरंजसापरमा
त्रंयथावकाशंवासंचरंस्यक्तानत्मूलात्पादोनचतुरंगुलाधिकसार्धपंचारत्नौशंकुः॥
अस्मात्रिमितरज्जुमध्येलक्षणंकृत्वाशंकोःपाशौप्रतिमुच्यलक्षणेनदक्षिणउत्तम

तश्चाहूक्व्यशंकूनिरुन्यात्॥ सापैतृकी वेदिः॥ यजमानमात्रा समचतुरस्रा दिक्षु यथा
स्रक्तयो भवंति तथा वेदिः कार्या॥ तन्मध्ये न्वाहार्यपचनं प्रणयेदिति॥ अंगप्रधानार्थे
षु मंत्रेषु देवशब्दादुपरि पितृशब्दः प्रयोक्तव्यः॥ केवलांगार्थेषु देवशब्दः॥ केवलप्रधा
नार्थेषु पितृशब्द एव॥ यजमानस्यर्त्विजां च दैवं मानुषं वा नाम न ग्राह्यं॥ यावदु
क्तं प्राचीनावीतमन्यत्र यज्ञोपवीतं॥ आदित एव वा प्राचीनावीतमा प्राजापत्यादिति
॥ याः पुरस्तादित्यादि प्राचीनावीती मरुतां पितृयज्ञस्य विधिर्यथेष्टि॥ ओंनयेस्यं तेमरु
पितृयज्ञस्तं बंधि हविः॥ व्रीहिमयः पुरोडाशः॥ यवमय्यो धानाः॥ यवमयः करंभः॥
अपबर्हिषश्चत्वारः प्रयाजाः॥ अग्नीषोमावाज्यभागौ॥ सोमः पितृमान् पितरो ब ॥३९॥
र्हिषदः पितरो ग्निष्वात्ताः॥ यम इति प्रधानदेवताः॥ अग्निः कव्यवाहनः स्विष्टकृद

र्थे॥ अपबर्हिषौ द्वावनूयाजौ॥ सूक्तवाकशंयुवाकौ॥ न पत्नीसंयाजाः॥ मध्योयस्य इत्सं
ने॥ गार्हपत्यमन्वादधाति॥ ममाग्ने॰ जयेम स्वाहा॥ ममदेवाः पितरो विहवे॰ अस्मिन्क्षय
हा॥ मयि देवाः पितरो द्रविणं॰ ऊतिः॥ दैव्याः पित्र्या होतारा॰ सुवीराः स्वाहा॥ अयान्वाहार्यपच
नं॥ मह्यं यजंत्वित्यादिनान्वाधाय पुनरुक्तमेवान्वादधाति॥ धाता धातृणां॰ देवाः पितरः पां
तुन्यूर्थस्वाहा॥ उरुव्यचा नो॰ द्राः स्वाहा॥ येनः सपत्ना॰ मर्कन्स्वाहा॥ दक्षिणाग्नेरुत्तर
तस्तिष्ठन्॥ अर्वांचमिंद्र॰ मेदिनं त्वेस्फ पनिष्ठते॥ नम्रता॥ अध्वर्युः इडाजपादि प्राचीना
वीती देवस्य त्वेत्यभ्रिमादाय॥ यज्ञस्य घोषदसीत्यादि देवेभ्यः पितृभ्यो जुष्टं॥ देवानां पितृ
णां परिषूतमसि॥ देवपितृबर्हिर्मा त्वान्वगा॰ राध्यासं॥ देवपितृबर्हिः शतवल्शं॰
देवं पितृन्नगमसि॥ नतस्त्वामहद्धा॰ कर्मणे वां देवेभ्यः पितृभ्यः शकेयं॥ आग्नेय्या

रिदक्षिणाग्निमथगार्हपत्यं परिस्तृणाति॥ गार्हपत्योत्तरतः स्तृणेष्वेकैकशः पात्राणि सा
दयति॥ कशिपूपबर्हणे अंजनाभ्यंजने दशाः स्फ्यं उदकुंभौ पर्णमयं तानि परिश्रयणं॥ स्फ्यं
कपालैः सहैकेन वै पात्रेणार्जनकपालं समेक्षणे इध्मशलाको चाग्निहोत्रहवण्येकैशू
र्पेदारुपात्र्याः सहस्त्रीणि पात्राणि योक्रुवर्जमन्यानि च॥ तत्राज्यस्थाल्योस्तदोपूर्वाज्यस्था
लीच॥ दक्षिणाग्नेर्दक्षिणतो ब्रह्मा तूष्णीं निरसनोपवेशने कुर्यान्नब्रह्मत्जपं॥ तूत्रमो
एव॥ यजमानस्तं वृणीते॥ भूपते॰ महते भूतस्य पते त्वा वृणीमहे॰ इदं॥ गार्हपत्या
दाद्दक्षिणं इध्मार्द्धं स्तीर्त्वापः प्रणयति॥ अपः प्रणेष्यामि वाचंयच्छेति॥ ब्रह्मणा जपवी
तं ओं प्रणयेत्युक्ते॥ दक्षिणाग्नेरुत्तरस्ताः प्रणयति॥ वेषाय त्वेत्यग्निहोत्रहवणीं शू ॥३८॥
र्पं चादाय प्रसुष्टमिति निष्टप्योत्तरेण गार्हपत्यं निहित नद्दारुपात्र्यां व्रीहीन्यवांश्चासंस्

वा

ष्टान्प्रक्षिप्याग्निमृशति॥ ध्रूरसि॰ ध्रुवयं ध्रूर्वीमस्त्वं पितृणामसि॰ वन्हितमपितृहूत
मम हुतमसि॰॥ मित्रस्य वां चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा वो हिंसिषं॥ वरुणीवा
तोय॥ हविर्निर्वपस्यामि॥ व्रीहीणां चतुरो मुष्टीन्निर्वपति॥ देवस्य॰ भ्यां॰ सोमाय पितृम
ते जुष्टं निर्वपामि॥ यज॰ अग्निं होतारं कुवे पितॄन्यज्ञियाँ॰ आयंतु पितरः सुमन
स्यमाना वियंतु पितरो हविषो मे अस्य॥ अध्वर्युः यवानां चतुरो मुष्टीन्निर्वपति॥
देव॰ भ्यां पितृभ्यो बर्हिषद्भ्यो जुष्टं निर्वपामि॥ पुनर्यवानामेव॥ देव॰ भ्यां पितृभ्यो ग्नि
ष्वात्तेभ्यो जुष्टं निर्वपामि॥ पुनर्व्रीहीणां॥ देव॰ भ्यां यमाय जुष्टं निर्वपामि॥ यजमानं
पूर्वं यदनुमंत्रयेत॥ अध्वर्युः॥ इमं पितृणां॥ इमे तन्नः सह॥ स्फाद्येवां नारातये ग
तुर्वेंतरिक्षमन्वितं॥ अदित्यास्त्वा मुपस्थे सादयामि॥ अग्ने हव्यं रक्षस्व॥ ततः

प्रोक्षणीः संस्कृत्य यथादैवतं व्रीहीन्यवान्वा शूर्पभेदेन प्रोक्षति ॥ पात्राणि च ॥ शुंध
ध्वं दैव्याय पित्र्याय कर्मणे देवपितृयज्यायै ॥ अवघातकाले ॥ अग्नेस्तनूरसि वाचो
विसर्जनं पितृवीतये त्वा गृह्णामि ॥ अद्रिरसि ॰ सदृढं पितृभ्यो हव्यं सुशमि शमि
ष्व ॥ अथैनद्विष्कृतमा कुर्यात् ॥ तंडुलप्रक्षालनांते ॥ पुनरवधूतमित्यादि यवानाव
पति ॥ अग्नेस्तनूं ॰ पितृवीतये ॰ अद्रिरसि ॰ पितृभ्यो हव्यं ॰ ष्व ॥ यवप्रक्षालनांते
क्षालनोदकं तं नैरृत्यां निनयेत् ॥ अधिवपने ॥ देव ॰ भ्यां ॰ सोमाय पितृमते जुष्टमधि
वपामि यमायजुष्टमधिवपामि ॥ धान्यमसि धिनुहि पितॄन्धिनुहि यज्ञं ॰ निर्यै
॥ धृष्टिरसीति धृष्टिमादाय गार्हपत्याद्दक्षिणतः ॥ आपितृयजं वह देसं गारं नि ॥ ३९ ॥
धाय षडुकपालान्युपदधाति ॥ ध्रुवमसि ॰ सजातानस्मै पर्यूह ॥ तत्र मध्ये त्रीणि

दक्षिणतो द्वयमुत्तरतो मध्ये एकमिति विभागः ॥ नकुत्तरतः ॥ आपितृयजं वह देसं गारं नि
धाय ॥ ध्रुवमसि ॰ नस्मै पर्यूहेति मर्जनक पालमुपधाय ॥ तस्मिन्यवान्प्रक्षिपति ॥
धर्मासि विश्वायुरिति यवान्मार्जयित्वा तूष्णीं एवं तुषीकृत्य द्वेधा विभज्यार्धं पितृभ्यो
बर्हिषद्भ्यः ॥ अर्धं पितृभ्योग्निष्वात्तेभ्य इति ॥ ततः कृष्णाजिनात्पिष्टानि पात्रांतरे कृत्वा
॥ अवधूननादि ॥ देवस्य त्वा ॰ भ्यां पितृभ्योग्निष्वात्तेभ्यो जुष्टमधिवपामि ॥ इत्यधिवपनं
॥ सकृन्यान्तांतरेणोप्य पूर्ववत्पिष्टानि कृष्णाजिने कृत्वा भर्जनेन पालादुदगंगारान्मुक्त्वा
द्विकपालमुपदध्यात् ॥ तत्र भृगूणामंगिरसां तपसा तप्येथां ॥ ये धर्मेक पालेंतप
नु = श्विंचैतोवृधर्मः ॥ पूतस्तस्ते अपिवृत ॰ युं त्वा ॥ देव ॰ सोमाय पितृमते जुष्टं संवपामि यु
मायजुष्टं संवपामि ॥ इत्यादि पिंडांतं कृत्वा यथादैवतं विभज्य षडुकपालप्रथनांते कृत्वा

॥आज्यमपूर्वाज्यंचनिरूप्यगार्हपत्याद्भस्ममिश्रांगारानपोह्यतेषुनवंमृन्मयंपात्रमधि
श्रित्यतस्मिंस्तिरःपवित्रमपूर्वाज्यमानीयतिरःपवित्रंधानास्त्रिधाऽऽरोप्यपात्रांतरेमृ
तवत्सायादुग्धमर्धपात्रमानीयतत्रतिरःपवित्रंसन्दूनोध्येकयेक्षुशलाकयादक्षि
णामुखोद्धृताभ्यामनारभ्यरज्वादिनामन्थानि॥स्थाल्याश्चोर्ध्वलग्नानांविघुणामंत्र
प्रक्षेपणंकृत्वाहस्ताभ्यांपिंडीकृत्यपूर्वनिहितनवपात्रोत्तरतोगार्हपत्याद्भस्ममिश्रां
गारेषुनवंपात्रंनिधायतत्रतिरःपवित्रंपिंडंनिधायतदुत्तरतःकपालयोःपुरोडाशं
निधायपुरोडाशयोस्त्वचंग्राहयित्वाश्रपणांतंकुर्यात्॥अग्रेणजघनेनवागार्हपत्य
माध्येभ्योनिनीयपैतृकायावेदेर्मध्येन्वाहार्यपचनादिध्मंप्रणयेत्॥ब्रह्मादक्षिणत ॥४०॥
स्तृणंनिरसनोपवेशनेकुर्यात्॥तत्पश्चाद्यजमानः॥अध्वर्युरग्नेःपूर्वार्धेक्तांबय

उ॰ अपत्नीककर्माणिनैवात्रनचाधिश्रयणंपुनरितिकल्पः॥५

जुर्हरति॥अयंवेदः०सविंदल्लोकमछिद्रंयज्ञंभूः०करोतु॥पृथिव्यैवर्मासिवर्मभव॥पृथि
विदेवपितृयजन्योषध्यास्ते०अपहतोररुःपृथिव्याअदेवपितृयजनः॥इमांनराःकृणुत
०नाभापृथिव्यायथायंनरिष्येत्॥वेदिंकिंचिदुद्धृत्याह॥इतस्त्रिर्हरेति॥उत्तरंपरिग्राहं
परिग्रहीष्यामि॥ब्रह्माजपवर्जं॥ओंपरिगृहाण॥प्रोक्षणीरासादयेध्माबर्हिरुपसादयस्रु
वंचस्रुचश्चसंमृढ्यानोदेहि॥नपत्नींसंनह्यनवृतग्रहणाज्यावेक्षणांतं॥अध्वर्युराज्यम
वेक्षते॥अग्नेर्जिह्वासिसुभूर्देवानांपितृणांधाम्नेधाम्नेदेवेभ्यःपितृभ्योयजुषेयजुषेभ
व॥जुह्वांपंचगृहीतंगृह्णाति॥[illegible]याजमानंप्रकृतिवत्॥पंचमेचतुर्थस्योभयोराहुतिं
॥अध्वर्युःउपभृतिद्विर्भक्त्यागृह्णाति॥ज्योतिस्त्वेति॥याजमानेचतुर्थादिमयोराहुतिः॥
॥अध्वर्युःअर्चिस्त्वेतिध्रुवायां॥धाम्नेधाम्नेदेवेभ्यःपितृभ्योयजुषेयजुषेगृ०भूरस्माकं॥

कं॥ हविर्देवानां पितॄणां॥ आशिषः॥ देवानां पितॄणां त्वा देवताभ्यः पितृभ्यो गृह्णामि॥ कामा
य त्वेति पंचमं॥ अध्वर्युः काले तूष्णीं प्रस्तरं गृहीत्वा तूष्णीं तत्र पवित्रे निधायान्यद्रूत्रोप्त
रं प्रदाय बर्हिः संनहनानि पैतृकवेद्या दक्षिणे संसमोप्य॥ दक्षिणांसमारभ्याप्रदक्षिणं अग्न
त्रिमुखैरन्वाहार्यपचनस्य संनिकृष्टतरैः संहतैः प्रथमं परिस्तृणाति॥ देवपितृबर्हिरूर्णाम्र
द संत्वास्तृणामि स्वासस्थं देवेभ्यः पितृभ्यः॥ प्रथमास्तृतमूलानि द्वितीयमुख्य अग्रैः प्रच्छादय
न्नुत्तथैव विप्रकृष्टं स्तृणाति॥ एवं तृतीयं॥ त्रिः प्रदक्षिणं प्रत्येकस्य परिधीन्परिदधाति॥ गंध
र्वोसि० दीर्घनः परिधिरिड ईडितः॥ यज० धृवोसि० अध्वर्युः इंद्रस्य० दक्षिणः परिधिरिड
ईडितः॥ य० उ मित्रावरुणौ० नोत्तरं॥ सूर्यस्त्वा० शस्त्याः॥ य० युनज्मि त्वा ब्रह्मणा दैव्ये ॥४३॥
न पित्र्येण हव्यायास्मै० वेदः॥ प्रकृतिवदूर्ध्वे समिधावाधाय॥ यजमानानु मंत्रेणां ते॥॥

अग्नेः पश्चान्मंत्रेण विधृती सादयित्वा॥ तयोस्तूष्णीं प्रस्तरं॥ तत्र जुहूं बर्हिषीतरे
मंत्रेणासादयेत्॥ आज्यपात्यानीत्यंतं कृत्वा हविरुद्वासयति॥ तत्र पुरोडाशार्थं दारु
पात्र्यां स्योनं तइत्युपस्तीर्य॥ इदमहं० सूर्यज्योति० आप्यायतां० सोमाय पितृम
ते जुहूमभिघारयामि॥ यथावदुद्वास्य पात्रांतरे धानार्थमुपस्तृणाति॥ स्योनं ते
सदनं० तस्मिन्त्सीद अमृते प्रतितिष्ठ यवानां मेधः सुमनस्यमानाः॥ अभिघा
रयति॥ आप्यायतां घृतयोनिः० [illegible] रवम कृत्वचमकृद्भ्रं सु [illegible] रूपावो वसुविदः प
शूनां तेजसा पितृभ्यो बर्हिषद्भ्यो जुहूमभिघारयामि॥ उद्वासयति॥ धानाऽउ
लोकेति जनित्र्यो मतीनां॥ संतर्पयति॥ आर्द्रः प्रथस्नवो भुवनस्य गोपाः पात्रांतरे
धानार्थमुपस्तृणाति॥ स्योनं ते० सीदामृते प्रतितिष्ठ यवानां मेध सुमनस्यमानः॥

ऽऽप्यायतां॰ तेजसाग्नि त्र्भ्योग्नि घ्राणेभ्यो जुहोमि॰ स्रंतर्पयति॥ आर्द्र॰ प्रथस्व॰ ऽपाः
॥नीपांजनं॥ पात्रांतरस्थोनं तद् इस्सु परस्तर्य॥ इदमहं॰ तेजसा प्रमायुस्तु होम मभिघा
रयामि॥ धृत॰ मस्थ॥ बहूकपालानुद्वास्य थानाकपालोद्वासनं॥ यदुमेकपालं॰ पि
कपालोद्वासने॥ येघ्नमेकपालं॰ चतां॥ अध्वर्युर्दारुपात्र्यामग्रे गच्छति॥ ततः सधा
नोन्यः॥ ततः सकरंभोन्यः॥ ततः सकरंभोन्यः॥ ततः सपुरोडाशोन्यः॥ अध्वर्यु
॥ अग्नेः पश्चाद्दक्षिणतः पुरोडाशं धानाः करंभं पुरोडाशं चोदगपवर्गं व्याहृतिभि
सादयति॥ हविर्धानं यनमग्रेणाहवनीयं॥ वेद्या दक्षिणतः परिश्रयणं निदधा
ति॥ वेद्या दक्षिणेंसे स्तीर्णे बर्हिषि कशिपूपबर्हणे आंजनाभ्यंजनदर्भास्फ्यं॥ उत्त ॥४२॥
रतश्चोदकुंभौ॥ वेद्यादक्षिणतो ब्रह्मयजमानावुपविशतः॥ अध्वर्युरग्नीधाउत्तरतः

यन॰ यन्मे अग्ने॰ उपस्थे॥ पितृयज्ञहविषामुद्वासनांते॥ स्थाना अस्तिदमादायेत्यादि
॥ तूष्णीं परिणोजनीयां कृत्वा पाणी संमृश्य॥ स्फ्यं च कपालानि चेस्फपलांतानिदध्मा॥ मेक्ष
णं च पिष्टं हपनीं च॥ पैतृकवेदं च दारुपात्रीं च धृष्टिं च मदंतीं चेत्यासाद्य॥ पवित्रे कृत्वा
यजमानवाचं यच्छेत् स्फ्यं स्फ्या वेधाय त्वेत्यादि॥ देव॰ हस्ताभ्यां॰ कृष्णायां विकायें जुष्टं निर्व
पामि॥ इति प्रति पुरुषमेकातिरिक्तं निर्वपेत्॥ एककपालवदुपधानं॥ आज्यनिनय
नांतं समानं॥ पितृयज्ञांते निधारितानुद्वास्य शरावे प्रक्षिप्य कपालोद्वासनांतं कुर्या
त्॥ सर्वममंत्रकं वा॥ मंत्रवत्पक्षे ध्वर्युर्निर्वापं कुर्यादन्यदन्यः॥ अथाध्वर्युर्होतारमाम
न्त्रयते॥ एहि॥ उत्तरश्रोण्यां प्राचीनावीतिनमाग्नेय्यभिमुखं स्थितं होतारमाह॥ अ
ग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूहीति॥ सर्वं मंद्रस्वरेण॥ प्रधानमुपांशु॥ हो

न्त्राज्जपवर्जं॥ दिं नू त्तुर्वःस्वरोमित्यक्के॥ अध्वर्युः घृतिप्रणवमेकैकां समिधमादधाति॥
यज॰ प्रथमसमिद्धोमे॥ अग्नयइ॰ ऽ कुम्भो॰ अग्नएधिनिशुम्भो॰॥ अग्नेदेवपितृद्भिमं
इजिह्व॥ होतुरार्षेयवरणान्नावाह्नयजमानस्यामर्त्येस्येति॥ अध्वर्युर्वेदेनोपवीज
यति॥ यज॰ प्रजापतयइदं॥ मनोसि॰ विश्व॥ अध्वर्युः परिधीचाग्निंचत्रिस्त्रिःसंमृ
ड्ढि॥ आग्नीध्रः प्रकृतिवत्संमार्ष्टि॥ अध्वर्युः [illegible] भुवनमसि॰॥ जुहूप
ग्निस्त्वाह्वयति॥ देवपितृयज्यायै॥ उपच्च देहि॰ ह्वयति देवपितृयज्यायै॥ संज्यो
तिषाज्योतिरं कामित्यं तं कृत्वा॥ उत्करे जू धुगंस्कंध॥ निरस्यामाविन आह॥ अग्नि
र्हवोदेवानितत्न्यक्षत्सीदइत्येतावदुक्त्वा होतारमीक्षेत॥ बर्हिर्वर्जं॥ प्रयाजांतं प्रकृ ॥४५॥
तिवत्॥ प्रयाजाज्यशेषेण ध्रुवां पुरोडाशं धानाः करंभं पुरोडाशस्तु पञ्चतमित्यग्नि

धारयेत्॥ प्रकृतिवज्जुह्वां कुमंतावाज्यन्नागाविष्ठा ब्रातपत्यादि प्रायश्चित्तं यज्ञोपवीत्या
हवनीयएवजुहुयात्॥ यज्ञोपवीतिनस्तथा याजमानं॥ अथ यजमानः प्रथममग्रे
णाहवनीयं परीत्योत्तरं तउपविशति॥ आध्वर्युस्तद्धा घृतोग्रेणाग्निं दक्षिणतः॥ तद्धा
ह्रतो ब्रह्मोत्तरतः सादयति॥ जघनेन धानाः करंभं नीत्वा दक्षिणतः सादयति॥ हवि
पात्र पुरोडाशं धानाकरंभयोः पश्चान्नीत्वा दक्षिणतः सादयति॥ जुहूमग्रेणोप
भृतमुत्तरतः॥ ध्रुवां जघनेनोपभृतं दक्षिणतः॥ वेदिं परिश्रयणेन परिवेष्ट्यो
त्तरतो द्वारं कृत्वा॥ परिकर्मिणमाह॥ अनेनोदकुंभेन संततयाधारया त्रिरपस्त
लेः परिषिंचन्पर्येहीति॥ परिकर्मी प्राचीनावीती कुंभमादाय तथा परिषिच्य॥ उद
कुंभं स्थाने स्थापयित्वा॥ यज्ञोपवीती पुनर्वेदिं त्रिःप्रदक्षिणं पर्येति॥ अथाध्वर्युर्जु

ध्रुं =

कामुपस्तीर्याह ॥ सोमाय पितृमते अनु स्वा३धा ॥ उपस्थानाभिमर्शनपूर्वकं पूर्वार्धात्पु
रोडाशस्यावदाय ॥ धाना उपतिष्ठते ॥ मा नैष्ट मा सं विजि ध्रुं मा वो हिंसिषं मा वस्तिग्मो
यक्रमीत् ॥ नरतमुदुरते मनु षिंचताव दानानि वः प्रत्यवदास्यामि नमो वो अस्तु मा
मा हिंसिष्ट ॥ पूर्वार्धान्मेक्षणेनावद्यति ॥ पुरोडाशवदुपस्थानाभिमर्शने कृत्वा पू
र्वार्धात्करंभस्यावद्यति ॥ अभिघार्य क्रमेण प्रत्यनक्ति ॥ धाना प्रत्यंजने ॥ यदवदाना
नि वो वद्यत्स्विष्टोमा कार्ष्म मात्मनः ॥ आज्येन प्रत्यनज्म्येनत्त्व आप्यायतां पुनः ॥ स्रु
वाकुतिं कृत्वा ॥ सव्येनात्याक्रम्योत्तरतो दक्षिणामुखस्तिष्ठन् आश्रावयेत् ॥ ओ३
स्वा३धा ॥ दक्षिणत उदङ्मुखस्तिष्ठन् प्रत्याश्रावयेदाग्नीध्रः ॥ अस्तु स्वाधेति ॥४४॥
॥ अध्वर्युः सोमं पितृमन्तं स्वधा ॥ होतास्य धानमङ्गस्कक्तोजु होति ॥ एवं सर्वत्र ॥

यज० सोमाय पितृमत इदं ॥ सोमस्य पितृमतो हं० न्नादो भूयासं ॥ अध्वर्युः दक्षिणत एत्य
स्रुवाकुतिं कृत्वानुद्धामुपस्तीर्याह ॥ पितृभ्यो बर्हिषद्भ्यः अनु स्वा३धा ॥ पूर्ववदुपस्थाना
दि मध्याद्धानामध्यात्करंभस्य मध्यात्पुरोडाशस्यावद्यति ॥ स्रुवाकुत्यंते ॥ ओ३ स्वा३धा ॥
अस्तु स्वा३धा ॥ पितॄन्बर्हिषदः स्वधा ॥ पितृभ्यो बर्हिषद्भ्य इदं० ॥ पितॄणां बर्हिषदामहं
देवयज्ययाष्टत्र दा भूयासं ॥ एवं पितृभ्योग्निष्वात्तेभ्योजुहोति ॥ तत्रापरार्धात्करंभपुरो
डाशधानानामवदानमिति विशेषः ॥ उपस्थानादि पूर्ववत् ॥ आश्राव्य प्रत्याश्रा
विते ॥ पितॄनग्निष्वात्तान्स्वधा ॥ य० पितृभ्योग्निष्वात्तेभ्य इदं० ॥ पितॄणामग्निष्वा
त्तानामहं० न्नादो भूयासं ॥ सर्वत्रान्नाद इति वा ॥ प्रत्याक्रम्य जुह्वामुपस्तीर्या
ह ॥ यमायानु स्वा३धेति ॥ उपस्थानाभिमर्शनांते पुरोडाशस्यावदायाभिघार्य प्र

त्यभिघार्यस्रुवाहुतिंकृत्वाश्राव्यप्रत्याश्रावितेयमंस्वधानमोवषट्कृतेजुहोति॥य
मायेदं०यमस्याहं०नादोभूयासं॥प्रत्याक्रम्यस्रुवाहुतिंकृत्वाजुहूकामुपस्तीर्यपुरो
डाशस्यावद्यन्नाह॥अग्नयेकव्यवाहनायानुस्वा३ध॥पुरोडाशधानाकरंभपुरो
डाशानांदक्षिणार्धात्सकृत्सकृदवदायद्विरभिघार्यचर्जनमेक्षणन्निक्कशाखा
कांचादायोनप्रत्यंजनंदंडःत्याक्रम्य॥ओंस्वधेत्यादिदक्षिणपूर्वेऽतिहायपू
र्वाग्नौजुहोति॥अग्नयेकव्यवाहनायेदं०॥अग्नेःकव्यवाहनस्याहं०युग्मा
न्यह्नेनप्रतिष्ठांगमेयं॥अध्वर्युःमेक्षणेक्रशाखाकेअग्नावनुप्रहरति॥स्रुवा
वेणाग्निजुहोति॥अथदक्षिणतएवसंस्थाञ्जननिनयनादिस्रुककुसादनांतंक ४५
रोति॥सर्वेपूर्ववद्द्विपरिक्रामंति॥विपरिहरंतिहवींषिस्रुचश्च॥प्राशित्रमवदा

यदक्षिणार्धादिडामवद्यति॥नचतुर्धाकरणं॥होतुरंगुलिपर्वणीअनक्ति॥यंत्रुह
पवर्षवर्ण०योदेवपितृयानःपंथास्तेनयज्ञोदेवान्पितॄनप्येतुस्माः॥एवमूहःकेश
वादिलिखितोपिचिंत्यइतिदेवचरणाःगुरवः॥अग्नीधेषडवत्तंदत्वाइलाप्राशनं
क्षंकृत्वानमार्जयंते॥अध्वर्युराह॥प्राशित्रंपरिहरेति॥आग्नीध्रःपरिहरतिब्रह्म
प्राग्दंडनिधानांतंतूष्णींकृत्वावघ्रायबर्हिष्यनुप्रहृत्याऽवनिनयनांकुर्यात्॥अ
न्वाहार्यविक्षणादौचतूष्णींकृतेयजमानस्तामेवदद्यात्॥हविरुछिष्टप्राशनां
तेयजमानउदंडेःस्पुरोडाशादिहरुपात्र्यांमिश्रयित्वापिंडान्कृत्वादक्षिणाग्नौ
णिदक्षिणांसोत्तरांस्तेषुअपूर्वेणस्फ्येनोद्धत्यावोक्ष्यनत्रपूर्वासादितपलाशाद्दं
तानिन्यस्यतेषुपितृतीर्थेनमार्जयति॥मार्जयंतांपितरः॥मार्जयंतांपितामहाः॥मा

र्जयंतां प्रपितामहाः॥ क्रमेणोपस्तीर्णाभिघारितान्पिंडान्ददाति॥ एतत्ते तत देवद
त्तशर्मन्ये च त्वानु॥ इति दक्षिणश्रोण्यां॥ एतत्ते पितामह० मन्त्रेति दक्षिणांसे॥ एतत्ते
प्रपितामह देव० मन्त्रेत्युत्तरेंसे॥ उत्तरश्रोण्यां हस्तलेपं निमार्ष्टि॥ एषा युष्माकमि
यमस्माकमिमां वयं जीवा जीवंतो नु संचरतो भूयास्म॥ अत्र पितरो यथाभागम्मं
दध्वमित्युक्त्वा सर्वे गार्हपत्याहवनीययोर्मध्ये चोनिष्क्रम्य दक्षिणाग्निमुपति
ष्ठंते॥ अपाविक्षाजनयन्नकर्वकाणिमद्धिघृणिरुरुवर्वरीय गातुः॥ सप्रत्नथेरु
णं मध्वो अग्रं स्वायत्तनू तन्वामेरयत॥ दक्षिणाह्वत एवाहवनीयं॥ सुसंदृशं त्वा
वयं मघवन्वंदिषीमहि॥ प्रनूनं पूर्णवंधुरस्तुतो याहि वशां अनु॥ योजान्विंद ४६
ते हरी॥ ततः स्थ एव गार्हपत्यं॥ अग्निं तं मन्ये यो वसुरस्तं यं यंति धेनवः॥

म
अस्तमर्वंत आशवोस्तं नित्यासो वाजिन इषं स्तोतृभ्य आभर॥ ततः पूर्वेण आहवनीयं प्राग्दक्षि
णेन गार्हपत्यस्य पुरस्तात्स्रुक्स्रुयोः समाप्तिर्यथा स्यात्तथा स्थानैर्गच्छति॥ मा प्रगाम पथो वयं मा०
यो यज्ञस्य०॥ मनो न्वाहुवा० सोमेन॥ पितृणां०॥ आ त एतु॥ पुनर्नः पितरो०॥ वयं सोम० सचे
महि॥ अग्ने त्वं नो अंतम०॥ स नो बोधि० सखिभ्यः॥ ततः स्वस्थानं गत्वा अध्वर्युः परिक्रमि
ष्यामाह॥ अनेनोदकुंभेन संततया धारयाग्निरपसव्यैः परिषिंचन्पर्येहीति॥ परिक्रमी पूर्ववत्क
रोति॥ यज० पूर्ववन्मार्जयति॥ मार्जयंतां पितर इत्यादि॥ कशिपूपबर्हणे पिंडसमीपे नि
दधाति॥ अंजनं ददाति॥ आंजतां पितर इत्यादि॥ अभ्यंजनं ददाति॥ अभ्यंजतां पितर
इत्यादि॥ दशां विभज्य ददाति॥ एतानि वः पितरो वासांसि॥ एतानि वः पितामहा वासा०
एतानि वः प्रपि०॥ उपतिष्ठते॥ नमो वः पितरो रसाय पितरो नमो वो य एतस्मिंल्लोके स्थ

युष्मा२ँस्तेनुयेस्मिंल्लोकेमांतेनुयएतस्मिंल्लोकेस्थयूयंतेषांवसिष्ठाभूयास्तयेस्मिंल्लोके
हंतेषांवसिष्ठोभूयासं॥नमोवःपितरःशुष्माय०नमोवःपितरोजीवाय०नमोवःस्व
धायै०नमोवःपितरोमन्यवे०नमोवःपितरोघोराय०इतिप्रतिमंत्रमनुषंगेण॥अथवी
रंयाचते॥वीरंमेपितरोदत्तपितरमानहंयुष्माभिर्भूयासंसुप्रजसोमयायूयंभूयास्त॥वी
रंमेपितामहादत्तपितरमा०वीरंमेप्रपितामहादत्त०भूयास्तेत्यनुषंगेण॥अथपिंडस्थान्पि
तॄनुत्थापयति॥उत्तिष्ठतपितरःप्रेतशूरायमस्यपंथामनुयातपुराणं॥धत्तादस्मासुद्रविणं
यच्चभद्रंप्रणोब्रूताद्भागधांदेवतासु॥अथपितॄन्मनसास्वस्थानेनिवेशयति॥यंतुपितरो
यथालोकंमनसाजवेन॥परेतपितरःसोम्यागंभीरैःपथिभिःपूर्व्यैः॥अथापितॄन्त्सुवि
दत्रा२ँअपीतयमेनयेसधमादंमदंति॥अथपितॄननुगतंस्वमनआह्वयते॥मनोन्वाहुवा ४७

महेनाराशंसेनसोमेनपितॄणांचमन्मभिः॥आनएतुमनःपुनःक्रत्वेदक्षायजीवसे॥ज्योक्चसू
र्यंदृशे॥पुनर्नःपितरोमनोददातुदैव्योजनः॥जीवंव्रातंसचेमहि॥पिंडान्सहपर्णैरग्नावनुप्रह
रति॥परिश्रयणमपनीयाध्वर्युराह॥प्रस्तरस्यामःसमिधमाधायपरिधीचाग्निंचसकृत्संमृ
ड्ढि॥अपबर्हिषौद्वावनूयाजौयजति॥देवौयजेतिप्रथमं॥यजेतिद्वितीयं॥स्रुग्व्यूहने॥वा
जस्यमेत्यादि॥ब्रह्मदेवाःपितरोवीवृधन्॥इषितादैव्याःपित्र्याहोतारोभद्रवाच्याय०॥यथा
देवतमुज्जितीर्वाचयति॥य०रोहितेनत्वाग्निर्देवतांपितॄन्गमयतुहरिभ्यांत्वेंद्रोदेवतांपितॄन्ग
मयत्वेतशेनत्वासूर्योदेवतांपितॄन्गमयतु॥अध्वर्युस्तृणमादायाग्नीध्रमवेक्षते॥सआह।
संवदस्व॥अध्वर्युःअगान्।आ०अगन्।अ०श्रावय।आ०श्रौ३षट्।अ०इदंब्रूहि।आ०अनुप्र
हर॥स्वगादैव्याःपित्र्याःस्वस्तिःशंयोर्ब्रूहि॥मध्यमंपरिधिंप्रहरति॥येपरिधिंपर्य०

अग्नेदेवपितृपणिभिर्वीयमाणः॥तंतप्न० वातै॥द्वितीयंय इस्यपाथउपसमिद्धि॥य०वि
तेमुंचामि० भागधांदेवतासुपितृषु॥विष्णोः शंयोरहंदेवपितृयज्यया०॥स्रुग्विमोकां
तेनपत्नीसंयाजाः॥नाज्येडा॥नचोत्सर्गविमोकः॥नदाक्षिणाग्निके। कुर्याद्वा॥होतुर्गार्ह
पत्यादातिप्रणीतादेदस्तरणांते॥अतिप्रणीतेप्रायश्चित्तानिहुत्वा॥नसंस्थाजपः॥ध्रुवा
प्यायने॥आप्यायतांध्रुवाघृतेनयज्ञंयज्ञंप्रतिदेवपितृयद्भ्यः॥सूर्यायां०॥यजमानस्व
भागंजिघ्रेणभक्षयति॥प्रजापते०दधामिसहस्र तः॥तोध्वैरतिप्रणीतेआश्रावितमित्यादि पु
जुहुयात्॥देवाः पितरोगातुविदोगातुंवित्त्वागातुमितमनसस्पतइमन्नोदेवदेवेषुपितृ
षुयज्ञं स्वाहा॥प्रणीतानिनयनादिब्रह्मसंस्थाजपवर्जंप्रायश्चित्तानिजुहुयात्॥ततो
यज्ञविमोकांतंप्रकृतिवत्॥नपयस्वतीरित्यादिनव्रतविसर्गः। अग्नेगृहपतइत्या ४८

दै। ताम् आशिषमाशासेतंतवे॥ इत्येवब्रूयात्॥ननामग्रहणं॥कशिपादिदद्देउद्वास्यसर्वैर्यज्ञोप
वीतिनोगार्हपत्यमुपतिष्ठंते॥प्रजानंत्वेपते० रयीणामिति॥यजमानोजपति॥यदंतरिक्षं०
मनेनसमिति॥यज्ञोबभूवेत्यादि॥ ॥ब्राह्मणतर्पणांतेष्टिः॥यद्वायज्ञोपवीतीयाः पुरस्ता
दित्यादियस्थ्यैइत्यंतंप्राचीनावीत्यन्वादधाति॥प्राचीनावीत्यग्निमादायेत्यादिउत्तरेणगा
र्हपत्यंदारुपात्रीनिधायेत्यंतं॥अथयज्ञोपवीत्यभिमृशानिधूरसीत्यादि।यजमानस्ययज्ञो
पवीत्यग्निश्होताभिति॥ततोयजमानायप्रस्तरादानांतेप्राचीनावीतीबर्हिःस्तृणाति॥
अथयज्ञोपवीतीत्रिःप्रदक्षिणंपर्येति॥आज्यभागांतेसर्वेप्राचीनावीतिनः॥सव्योन
र्युपरस्ताश्चप्रधानादिस्रुकसादनांतं॥अथयज्ञोपवीतिनोविपरिक्रामंत्यक्षितो
विपरिहरंतिध्रुवीषिइत्यादिहविरुच्छिष्टोद्वासनांतेप्राचीनावीतिनोयजमान

स्थदारुपात्र्यांपुरोडाशाभिश्रयणादिगार्हपत्याहवनीययोरुदंचोनिष्क्रम्येस्यतं॥अथयज्ञो
पवीतिनःसर्वेदक्षिणाग्निमुपतिष्ठंते॥सर्वेपृस्थानांतेप्राचीनावीतिनः॥परिकर्मिण
माहेत्यादिपरिश्रयणमपनीययज्ञोपवीतिनोभवंति॥ततःप्रस्थास्यामइत्यादिपञ्चवि
भोकांतं॥अथप्राचीनावीतिनःकशिपादीन्युद्वासयंति॥सर्वेयज्ञोपवीतिनोगार्हपत्य
मुपष्ठंते॥आदितएवप्राचीनावीतित्वमाप्राजापत्यात्॥यावदुक्तंप्राचीनावीतमन्य
त्रयज्ञोपवीतं॥यावदुक्तमेवयज्ञोपवीतमन्यत्रप्राचीनावीतमितियज्ञतंत्रोक्तेः॥
॥ ॥इतिमहापितृयज्ञप्रयोगः॥ ॥अथत्र्यंबकेष्टिः॥ ॥अध्वर्युर्नीललोहितेसू
त्रेपल्लाशंशांतिमपर्णअन्वाहार्यपचनादेकोल्मुकमुदपात्रंदर्भानित्यादत्ते॥ततःसर्वेगा
र्हपत्यमुपतिष्ठंते॥यावंतोगृह्यास्मस्तेभ्यःकमकरंपश्चनाम्शर्मासिशर्मयजमा 

नस्यशर्ममेयच्छ॥मंत्रेणयजमानाध्वर्यूतूष्णीमितरे॥सव्यावृतउदङ्मुखाश्चतुष्पथंयंति॥
तंप्राप्योपलिप्योल्मुकमाधायज्वालयित्वापरिस्तीर्यपरिषिच्यसमिधमाधायोपस्तरणा
भिघारणवर्जंसकृत्सकृदुत्तरार्धादवदायमध्यमपर्णेनतिष्ठन्नध्वर्युर्जुहोति॥एकएवरु
द्रोनद्वितीयायतस्थेआखुस्तेरुद्रपशुस्तंजुषस्वैषतेरुद्रभागःसहस्वस्राम्बिकयातंजु
षस्वभेषजंगवेश्वायपुरुषायभेषजमथोअस्मभ्यंभेषजंसुभेषजंयथासति॥सुगंमे
षायमेष्याअवांबरुद्रमतिमह्यवदेवंत्र्यंबकं॥यथानःश्रेयसःकरद्यथानोवस्यसःकर
द्यथानपशुमतःकरद्यथानोव्यवसाययात्स्वाहा॥यज॰रुद्रायांबिकायाइदं॰॥पर्णमाखु
बिलेनिधायप्रतिपूरुषंमेकैकंयजमानायद्वौत्र्यंब॰कानांप्रयच्छति॥सर्वेदक्षिणाद्भिनूरु
पघ्नानाअग्निंप्रदक्षिणंयंति॥त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनंउर्वारुकमिवबंधना

मृत्योर्मुक्षीयमामृतात्॥ इति सकृत्सर्वे सोत्तरतः स्थित्वा पुरोडाशानूर्ध्वं क्षिपंति॥ हस्ताभ्यां
गृह्णंति॥ भगाय त्वेति॥ एवं द्वितीयं तृतीयं परियंति॥ पतिकामा प्रत्ता कन्या त्रिरपसव्यं प्रस
र्पंति॥ सव्यमूरुमुपघ्नाना॥ त्र्यंबकं य॰ सुगंधिं पतिवेदनं। उर्वारुकमिव बंधनादितो मुक्षीय
मापतेः॥ इति तस्या विशेषः॥ सकृत्सर्वे सोत्तरतः स्थित्वा भगमुत्क्षिप्य भगाय त्वेति हस्ताभ्यां
गृह्णाति॥ एवं द्वितीयं तृतीयं॥ ततः सर्वे उत्तरतस्तिष्ठंति॥ अध्वर्युः सर्वान्पुरोडाशान्गृहीत्वा य
जमानांजलावावपते॥ प्रजया त्वा पशुभिः संसृजामि मा क्षुरेण सुरामिव॥ तान्यजमानः
पत्न्यंजलावावपति॥ प्रजया त्वा॰ मिव॥ तान्पत्नी दुहितृंजलावावपति॥ भगेण त्वा संसृ
जामि मा क्षुरेण सुरामिव॥ अथाध्वर्युस्तान्पुरोडाशानादाय तृणवृते मूते प्रक्षिप्य नील
लोहिताभ्यां सूत्राभ्यां विवध्यं बध्वा तत्र देशे वृक्षे शुष्के स्थाणौ वृक्षछिन्नशुष्कशाखायां वा तू ८

ष्णीं बध्नाति॥ सर्वे दिवं प्रेक्षमाणा यावदुष्णा संभूतमुपतिष्ठंते॥ एष ते रुद्र भागस्तं जुषस्व ते
नावसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥ आत्मनो मुतस्य च
मध्ये दीर्घधारारूपेणोदकं निनीय पूर्वं गृहीतमुदपात्रं परास्य पृष्ठतोऽनवेक्षमाणा य
थागतमायंति॥ हस्तपादान्प्रक्षाल्याचम्य॥ ॥ इति त्र्यंबकेष्टिः॥ ॥ तेष्वेवाग्निषु
आदित्येष्टिं कुर्यात्॥ ॥ यः पुरस्तादित्यादि आदित्येन हविषा यक्ष्ये॥ आदित्यं
हविः॥ व्रीहिमयश्चरुः॥ पंच प्रयाजाः॥ आग्नीषोमावाज्यभागौ॥ अदितिः प्रधा
नदेवता॥ अग्निः स्विष्टकृदित्यादि सद्यो यक्ष्य इत्यंते॥ अन्वाधानादिनव्रतं॥ स
प्तदशसामिधेन्यः॥ सांतपनवर्हि॥ पात्रासादनादि॥ देवीर्द्वारिया इह याहवा
महे॥ आसीदंतु देव्यः सुमनस्यमाना वियंतु देव्यो हविषो मे अस्य॥ इदं देवाना

मिति॥प्रधानमुच्चैः॥अदित्साअहंदेवयज्ययाऽऽहसोमुच्येयं॥अन्वाहार्यमासाद्य
त्तिस्रोगाददाति॥व्रतविसर्गादिसर्वंपूर्णमासवत्॥निवर्तनादिपूर्ववत्॥मंत्रे
विशेषः॥यइमांपृथिवीमहीं॥ऋतुभिःपर्यावर्तयितु॥योअस्याःपृथिव्यास्त्व
चि॥निवर्तयत्सोषधीः॥अग्निस्तरीशानओजसा॥वरुणोधीतिभिःसह॥इंद्रो
मरुद्भिःसखिभिःसह॥अग्निस्तिग्मेनेत्यादि॥इदावत्सरीणाऽऽस्वस्तिमा 
शास्ते॥इतिविशेषः॥ ॥संतिष्ठतेसाकमेधपर्व॥ ॥अथशुनासीरीय
प्रयोगः॥ ॥अपरेद्युःप्रातर्हुतेऽग्निहोत्रेयाःपुरस्तादित्यादिशुनासीयहवि
र्भिर्यक्ष्ये॥ओंतथेंसंते॥शुनासीरीयऽऽहविः॥व्रीहिमयःपुरोडाशः॥व्रीहिमय 
श्चरुः॥पयश्च॥नवप्रयाजाः॥अग्नीषोमावाज्यभागौ॥अग्न्यादिपूषांते॥ 

विश्वेदेवाः

वायुरिंद्रःशुनासीरः॥इंद्राग्नीसूर्यइतिप्रधानदेवताःअग्निःस्विष्टकृत्॥नवानुयाजाः॥
सूक्तवाकशंयुवाकौ॥चत्वारःसप्ताष्टौवापत्नीसंयाजाः॥एवमासकेन॰श्वःसद्योवाय
क्ष्ये॥विहरणादिव्रतांते॥अध्वर्युःइडादेवहूर्देवागातुविदइतिजपित्वा॥इषेत्वेतिशा
खांछित्वा॥यजमानस्यपशून्पाहीसंते॥असिदादानादिवैश्वदेववदिध्मसंभरणांते॥
ध्यहःपक्षेऽग्निहोत्रहोमांते॥तूष्णींदर्भैर्बर्हिरापाकरणं॥नसायंदोहः॥पाणिसं
मर्शनादि॥स्रुचश्च॥१५कपालानिच५चरुस्थाल्यश्च५मेक्षणानिच॥पृषदाज्यग्रहणं॥
आशयपात्रंचेति॥सविशेषाण्यासादयेत्॥निर्वापे॥अग्न्यादिपूषांते॥इंद्रायशुनासी
राय॰इंद्राग्निभ्यां॰विश्वेभ्योदेवेभ्यः॰सूर्यायेतिनिरूप्य॥अवघातांतेप्रातर्दोहः॥इ
हवोवायूरमयतुगावः॥प्रणोब्रूहिवायवेहविरिंद्रियं॥बहुदुग्धिवायवेदेवेभ्योह

॥इतिशुनासीरीयपर्व॥ ॥संतिष्ठतेचातुर्मास्यानि॥ ॥बौधायनीयकल्पोक्तचातुर्मास्यनि
रूपणं॥अकार्यनंतदेवेननतेनतुष्यतियज्ञभुक्॥ ॥इतियथाप्रयोगपक्षमवलंब्यबौधाय
नीयआश्वलायनोगीचातुर्मास्यप्रयोगोनवहस्तारघुनाथकृतःसंपूर्णः॥ ॥छ॥ ॥छ॥
॥छ॥ ॥छ॥ ॥छ॥छ॥ ॥छ॥ ॥छ॥छ॥ ॥छ॥छ॥ ॥छ॥ ॥छ॥छ॥ ॥छ॥ ॥

॥श्रीगणेशाय नमः॥ ॥प्रणम्यैकरदं देवं सारदां गुरुमेव च। कुंडप्रदीपकं कुर्वे बा
लाज्ञानतमोपहं॥१॥ अहं कुंडप्रदीपकं कुर्वे इत्यन्वयः। किं कृत्वा एकरदं देवं गणेशं
च परं सारदां वाग्देवतां गुरुं प्रणम्य। कुंडमंडपादिज्ञानशक्तिता बालास्तेषां तद्विषया
ज्ञानं तादेव तमस्तदपहं दीप्त्यैवं विधः कुंडप्रदीपकस्तं। अथ कुंडस्य दोषगुणादोषानाह॥
आयुरिति। कुंडं स्वमानान्वितं सत् आयुःकीर्त्तिकलत्रपुत्राणां सुखकृद्भवति। कुंडमि
त्युपलक्षणं। मंडपवेद्याद्यपि। न दरोगप्रभृतिवन्न्यूनाधिकयुतं सत् रुग्गादि कुरुते॥ त
दुक्तं कामिके। मानाधिके भवेद्रोगो मानाल्पत्वे दरिद्रता इति। एतत्कुंडादि दिशामूढं म
र्त्यक्षयं करोति। तदुक्तं वास्तुशास्त्रे। प्राकारालयमंडपादि कुरुते दिग्मूढमर्त्यक्षये
त। तस्मात्कुंडस्य सुनिर्मितिः सम्यक्साधितक्षेत्रफलादिकशुद्धिर्वि यथा भवति तथा नि १

मीणं। विरचये प्रकरोमीत्यर्थः। भूसमीकरणमाह। पूर्वं तथा इलांएढ्ढीकृत्वीकुरु।
तथा कथं। यथा पायसा जलेन पूर्णं पात्रं यद्यस्यां भुवि तलेन चालितं सत् कं जलं नो जहेत्। ए
तदुक्तं भवति। एतच्च वर्त्तुलप्राकारवती जलपूर्णा स्थाली शनैः शनैः भुवि चालनीया। य
त्र भुवि सा स्थाली मध्यस्थं जलं नो जहेत्। न त्यजेत्। सा समैव भूः। अन्यत्र दत्वा वोद्धृत्य स
मीकर्त्तव्येति। अथ दिक्साधनमाह। याम्योदगिति। याम्योदीचीगतौ यौ कुंतौ भित्तौ
तयोर्यष्टीनेत्रप्रनिगच्छतीत्येवं विधा दृष्टिस्तया दौ ध्रुवं ध्रुवतारां विध्यतः तयोस्तलाता
वान्मत्स्यसमागमः। तस्मात्प्राचीप्रतीच्यौ ज्ञेये। एतदुक्तं भवति। यावत्तान्तरेण कुं
तौ स्थाप्यौ तावत्तान्तरेण लम्बस्य संपातः कार्यः। तयोः समागमाडुनयसंपातात्प्रा
चीप्रतीच्यौ दिशौ स्फुटतरे स्तः। एतदुक्तं भवति। सममत्स्यशीर्षे कुंतः उदीच्यां स्था

ष्यः। द्वितीयो दक्षिणस्यां दिशि कियतांतरेण तथा स्थाप्यो यथा न दृष्टिं दत्वा ध्रुवतारा।
सौम्यमुखेन दक्षशंकुर्दृष्टिरूपेतः। तत्र लंबं दत्वा चिह्नद्वयं कार्य्यं। ते याम्योदीच्यौ। ततस्तिस्त्राद प
रचिह्नमिति प्राक्परसूत्रं तेन मत्स्यो कार्य्यो। तयोः संपातयोः प्राचीप्रतीच्यौ स्तः। तत
श्चिह्नचतुष्कपरिगतचतुःसूत्रैश्चतुरस्रं समकोणं साध्यं। अथ हस्तादिमानमाह॥
उत्कोर्ध्वपदस्थयज्वमितिः तदिति। उत्तूर्ध्वौ बाहू यस्य पादेन पादाग्रेण स्थितो यो य
ज्वा यजमानस्तस्य मितिः पादांगुष्ठादारभ्य करमध्यांगुली यावत् कंवया साधितं मा
नं। तदीयो द्वांशः पंचमांशः सभुजो हस्तः स्यात्। भुजस्य वेदांशः चतुर्विंशांगु श्रो
लं। इतोंगुलादष्टमलवो यवः। इतो यवादष्टमलवो यूका। यूकाया अष्टमलवो लिक्षा। २
अत्र गणिते त्वेतेषां मानानां प्रयोजनं वर्त्तते। न तु वालाग्रप्रभृतीनां तेन न तदुपेक्षा॥ मं

डपमानमाह। धृपद्योरिति। धृपद्योऽष्टदसोमैर्नात्मानं गृहीत्वेति ल्यब्लोपे पंचमी।
धृतेर्मानमष्टादश। अष्टेर्मानं षोडश। तत्तुल्यकरैर्वेदास्रः समचतुरस्रमंडपाः श्रेष्ठः॥ म
नवश्चतुर्दश। सूर्याब्धिदशान्मानहस्तैर्वेदास्रो मध्यमो मंडपः। इनाष्टादशादिशो
दशान्मानहस्तैश्चतुरस्रोल्पको भवति। यन्मते षोडशहस्तः श्रेष्ठस्तन्मते द्वादशह
स्तो मध्यो दशहस्तोल्पकः। तन्मूर्वेत्वष्टादशचतुर्द्दशद्वादशहस्ताः श्रेष्ठमध्याद्याः।
तेन न पुनरुक्तिः। उत्पादादानाद्यविधौ समंडपो नखकरैः संमितकः। अत्रापि प्रा
गानीतप्रागपरोदगपाक्सूत्रेषु यावाद्दशहस्तापर्यन्तं सूत्राणि वा वंशान् प्रसा
र्य्य तद्यस्य कचतुःसूत्रैश्चतुरस्रो मंडपः समकोणः कार्य्यः। इमं मंडपं चाष्टकरं त्रि ॐ
र्नवधा नेत्वा अन्तरा मध्यखंडमिता वेदी कार्य्या। सा वेदिका निजविस्तारस्य तृती

यचतुर्थपंचमसप्तमनवमेकोदशनागेरुद्राकार्या॥ ॥ तेषां दिक्कल्प्याः। सा वेदी चतुस्तंभयुक्त
वेदीकोणस्तंभकोणाविं यथा स्युस्तथा चेया॥ स्तंभमानमाह। कोणेष्वस्तंभेनेति। सारद्रुम
जं कोणेषु स्तंभचतुष्टयं यत्र दष्टकरे रुद्रं कार्यं बहिर्येहादशास्ते नाम्ने पंचकरोन्मिताः का
र्याम्तेस्तंभा वेधवर्जितीरज्वोर्धुतिगतास्थाप्याः। वेधवर्जिता इति समसूत्रस्थाः स्थाप्याः ते
षां मानस्तंभानां दशांगुलपरिणाहा वेदास्त्रावर्तुलास्तथा। तेषां मूर्द्धसु त्राल्यानि कृत्वा
वलिकास्तिरश्चीः क्षिपेत्। तानि त्राल्यानि स्तंभप्रमाणतोधिकानि कार्याणि॥ ॥ तदुस्तंभप्रमा
णेत्राल्यानि कुर्वीत। ततः प्रदिशं चतुर्दिक्षु द्विहस्तायतं द्विहस्तविततं द्वारं कार्यं मध्ये
मंडपे तद्द्वारं अष्टांगुलानि चतुरंगुलानि नैर्युक्त्युतं कार्यं। वरश्रेष्ठमंडपेन द्वारं। तानि
ष्टवोकान्यंगुलानि द्विगुणानीति। अष्टांगुलानि त्तेर्धुमुघस्तद्वयं कार्यं। तस्य द्वारस्य २

पुरःसये हस्तमात्रप्रदेशे तोरणं वक्ष्यमाणप्रकारं क्षिपेत्। तोरणान्याह। बोधिरिति॥
बोधिरश्वत्थः प्लक्षोरुटी उदुंबरो जंतुफलः वटोन्यग्रोधः। इतः एषां शाखाः कार्याः।
कथं। कनीयो मध्योत्तमेषु मंडपेषु। पंचषट्सप्तहस्तैस्तुल्याः कार्याः। तासां व्यव
स्थाः। प्रागश्वत्थशाखे। पश्चिमे प्लक्षशाखे अपाग्दक्षिणे उदुंबरशाखे। उपदक्वटश
खे। कन्यसेऽल्पके मंडपे तयोः शाखयोः कृतशीर्षशाखयोर्मूर्ध्नि द्विहस्तविततं फल
कं तिर्यक् कोष्ठं स्यात्। उपरितनशाखेत्यर्थः। अन्ययोर्मध्यमायोर्हस्तपादाधिकहस्त
फलकं स्यात्। क्रमेण त्रिषु मंडपेषु शाखाफलकमूर्ध्नि वेदांगुलैश्चतुर्भिः करांगु
लैः सार्द्धयुगांगुलैर्वरर्द्धसप्तभिः चतुरंगुलैः रामांगुलैः पंचांगुलैर्मितान् कीलका
न्वक्ष्यमाणप्रकारान् विरचयेत्। तस्य कारमाह। शैवइति। शैवे वैमंडपे तान् की

लकान्विरचयेत्स्तंभनिभान् । चपरौ वेत्रवेमंडपेकं बुः शंखः । अरं चक्रं । गदा कौमो
दकी । पद्मं कमलं । तत्सन्निभान् तत्सदृशान् कीलकान् पूर्वोक्तमानान् विरचयेत् ॥
स्थूले विशेषमाह । द्वौ पार्श्वकीलकौ वक्रौ । अंतरामध्ये समाणतान् नवांगुलमि
तान् विरचयेत् । मध्यमोत्तमयोर्द्विर्द्विर्वृद्धिः । मध्यममंडपे त्वेकादशांगुलमि
तान् । श्रेष्ठमंडपे त्रयोदशांगुलमितान् । सर्वान् स्वकरीयभागविस्तारेण विर
चयेत् । । तेस्वल्पे मंडपे कीलकाः । फलकस्य केमस्तके समस्तके मध्यभागोप
रि द्व्यंगुलमात्रं विशेत् । अपरयोर्मध्यमोत्तमयोर्न्यूनवृद्ध्या । एकद्वित्र्याद्यात्रिचतुरं
गुलानि विशेत् । चपरौ स्तंभान् शाखाः शालवैः स्वकीयपंचमांशैः हितावघट
हि पेत् । निदध्यात् । मंडपाच्छादनमाह ॥ । । कोणेषु स्तंभमिति । बाह्यकोणस्तं । ४

भावेदीकोणस्तंभास्तथान्येष्टौ स्तंभास्तेषां मूर्द्धसु मस्तकेषु अविद्धितो निहिताया
वलिकास्तानि स्थूतसृग्भिः प्राक् प्रथमं मध्ये उच्छ्रितिं शिखराकारं विधाय तावलिका
ऊर्ध्वं उपरिभागे दारुकं अनेकाष्टकलशादिनिहितवदनानिहितमाः स्युः । एन दुकं भवति
। प्रथमं बाह्यस्तंभमस्तके स्यो वेदीकोणस्तंभशाल्येषु सरेभवल्लीः हित्वा तदूर्ध्वं च तस्य
निरुच्छ्रितिं विदध्यात् । पश्चाद्यथावकाशं सर्वत्र काष्टकलिकादत्वा कटैरेष मंडपश्छाद्यो
पनीयः । प्रागादिक्रमेण ध्वजानाह । प्रागिंद्रस्य पीतः । आग्नेय्यामग्नेरक्तः । याम्ये यमस्य कृ
ष्णः । निरृतौ राक्षसानां धूम्रकं तनु महत्शोनीलः परे वरुणस्य श्वेतः । वायुकोणे वायोर्धू
म्रः । उदग्धनेरकुबेरस्यासितानाः उज्वलः । ईशान्यामीशस्य शुक्लो नैरृति पश्चिममध्ये
ब्रह्मणो विचित्रो नानावर्णो ध्वजः इति हरितां पालकानां दिशामधिपानां ध्वजाः स्थाप्याः

महेंद्रदिशादारभ्येत्यर्थः। तेषां ध्वजानां दंडानां मानमन्यग्रंथोक्तं लिख्यते। पंचहस्तमिता
दैर्घ्ये द्विहस्ताः पताका ध्वजाः। दिग्वर्णदंडसंबंधास्ते शवाहनतोंकिताः। प्रतिदिशं पता
काः स्युः सप्तकं हस्तमितास्तथा। हस्तमात्रायता लोकपालानां स्वायुधांकिताः॥
अत्रापि ध्वजदंडनिखननं पंचांशमितमेव। अथ होमसंख्यायां कुंडमाह। पंचा
शास्युद्धृति। ५। पंचाशात्स्वाहुतिषु क्रियमाणासु मूर्ध्नां गुलमेकविंशसंगुलं कुं
डं भवति। शतो शतो हुतिहोमे बद्धमुष्टिमानं सार्द्धांगुलाधिकमिति सार्द्धद्वाविंशत्यं
गुलं कुंडं भवति। द्विकशतके सहस्राहुतिहोमे हस्तः कुंडं। पुरोक्ताद्दशगुणो वा।
न्यासकाशात् द्विगुणा कुंडं स्यात्। एतदुक्तं भवति। अयुतहोमे द्विहस्तं। लक्षहोमे च ५
तुर्हस्तं प्रयुतहोमे षट्हस्तं। कोटिहोमेऽष्टहस्तं। अत्र केचिल्लक्षहोमे हस्तमितं कुंड

माहुः। पुरतो लक्षवृद्ध्या हस्तैकवर्द्धने। यावत्कोटिः दशलक्षं यावत् हस्तमात्रं वृद्धिमाहुः
पुरातो कोटिहोमे दशहस्तमितमिति। एतदुक्तं भवति। दशलक्षे द्विहस्तं विंशतिल
क्षे त्रिहस्तं त्रिंशल्लक्षे चतुर्हस्तं। एवं कोटिहोमे भवति लक्षप्राप्ते दशहस्तमानमेव
याद्येतन्मतं। कुंडानां स्थापनमाह। वेद्याः सकाशात् पदमितामवनिं परिहरन् त्य
जन् प्रोक्तदिङ्नत कुंडमार्गमेतद्विरचयेत्। अत्र तत्र राजशारदावाक्यात्। वेद्यादी
कोणाष्टसूत्रमध्यकुंडमध्ये स्यात्तथा कुंडं कुर्यादित्यपि मतं केचिदगित्वादाप्र
कृत्तनेति शतिः। ग्रंथेनोवेरिणां स्तंभनप्रयोगे क्रियमाणे वेद्याः पूर्वदिक् चतुर
स्रं वह्निमारणमानेन कुंडं कुर्यात्। इति शेषः। रोगे रोगप्रयोगे नीष्टे अग्नि विषये
आग्नेयप्रदेशो वरांगेषु यो निकुंडं कुर्यात्। रिपुमारणप्रयोगाय यापां रदक्षिण

दिशि हस्तार्द्धमर्द्धचन्द्राभं कुंडं कुर्यात्। द्वेषे विद्वेषणे निर्ऋतिकोणे त्रिकोणं कुंडं कुर्या-
त्। शांतिप्रयोगे परे पश्चिमभागे वृत्तं कुंडं कुर्यात्। अथोच्चाटनप्रयोगे ऽनिलदि-
शि वायुकोणे षट्कोणं कुंडं कुर्यात्। पुष्टये पुष्टिप्रयोगाय सौम्ये पद्मं कुंडं कुर्या-
त्। मुक्तये मुक्तिप्रयोजनाय ईशकोणे विषये वसुकोणमष्टास्रिकुंडं कुर्यात्। अथ
ति कामनमेकमेव कुर्यात्। सर्वकामनः सर्वाणि कुर्यात्। ततः कुंडनिर्माणमे-
वोच्यते। स्याद्वेदास्रि इति। ११। अत्रैकहस्ते कुंडे पिचिते जिनांगुलैः चतुर्विंशत्यंगुलै-
श्चतुर्भुजैः समकर्णं वेदास्रि चतुरस्रं कुंडं स्यात्। आयते चतुरस्रे च भुजकोटिव-
धात्फलं। तेन चतुर्विंशत्यंतिघाते जातं फलं ५७६। अत्र वास्तुशास्त्रोक्तविधिरक्ष- ६
णार्थं यूकामात्रं सर्वभुजेष्वधिकं कार्यं। यथा क्षेत्रफलेषु न केकिंचिदंगुलाल्प-

कमवशिष्टं स्यात्। तेन ध्वजत्र्यायो भवति। देवागारे तथा कुंडे ध्वजः आयः प्रशस्यते इत्या-
यतत्वीकृतत्वात्। रामवाजपेयिनिर्यदायोनादनस्तत्स्वगणितेन्यूनाधिक्यान्नांकयोऽ-
दयत्क्षेत्रफलं तत्सर्वत्र योनिकुंडादिषु तुल्यमनिषेतं स्यात्। अथ सार्द्धद्विधास्या-
दिकैः सार्द्धद्वीयवाधिकैस्त्रिंशच्छिरंगुलैस्त्रिभुजैः कृतैः परार्द्धदलयोर्भ्यावृद्धिर्निति-
बद्धयं कार्यं श्रोणिद्वयं कुर्यात्। तदा भगं कुंडं स्यात्। एतदुक्तं भवति। सार्द्धद्वियव-
युक्तत्रिंशदंगुलैस्त्रिकोणं प्रागग्रं कार्यं। तत्र परभुजार्द्धमानेन कर्कटकेन बद्धिर्नितंबद्व-
यं श्रोणिद्वयं कार्यं। एवं वरांगं कुंडं संभवति। अत्र फलोपपत्तिः। प्रथमं लंबसाधने स्वाबाधा-
भुजभुजकृत्योरंतरमूलं प्रजायते लंब इति। पश्चिमभुजार्द्धं १५।१८ समाबाधा। भुजः ३०।२५।४।
कृती २२५।५४।५५ भुजकृतिः ९१५।२८।१६ अनयोरंतरं ६८९।३४।२१ मूलं २६।१५।२७ अयं लंबः।

लंबगुणंभूम्यर्द्धंस्पष्टंत्रिभुजेफलंभवतितिज्ञातंत्रिकोणफलं ३५०१ अथश्रोणीफ
लमानीयते। श्रोणीद्वयेनवृत्तंसंपन्नं। तद्व्यासः १५१५२ व्यासेनघ्न ३९२७ नंदाग्निदंतै।
विभक्तेखबाणसूर्य्यैः १२५० परिधिस्त्रिसूत्रजनितजातःपरिधिः ४७१४ वृत्तक्षेत्रेपरिधिगु
णितव्यासपादःफलंस्यादिति। परिधिगुणित १९५८१ पूर्वफलेयुक्ते ३५८१ जातंफ
लं ५७६३१ एतदेवचतुरस्रफलंसावशेषं। अथवाहृत्तव्यासेद्विदो २२ निघ्नेसप्ताप्तेप
रिधिर्भवेत्। तद्वेदांशाहृतेव्यासेवृत्तक्षेत्रफलंहितत्। अत्ररामवाजपेयिग्रंथयोर्द्वयोः।
निकुंडमुक्तंतत्रतेत्र्यस्रफलं ४१३ श्रोण्योःफलं ११२ योगेजातं ५७१५ अत्रत्रिय
वांतरेभ्यायधिकत्वाएव। आयातिसाधियवाद्यागोकृतिः सपादयवयुगेकैको १
नविंशत्यंगुलव्यासार्द्धमानेनवृत्तंकार्य्यं। अतोस्यार्द्धकार्य्यंतदेवहृत्तार्द्धकुंडं।

भवति। अत्रफलोपपत्तिः। क्षेत्रेपरिधिगुणितव्यासपादःफलंतस्यार्द्धंकार्य्यं। अत्रव्या
सः ३८२४ परिधिः १२०१३ परिधिगुणितव्यासः ४६११ पादः ११५२६ अस्यार्द्धं ५७६३ अ
फलंतदेव। अत्रापिवाजपेयिमते परिधिः १२०१२ व्यासः ३६११ पादः ३८२ फलं ५७४१२ अ
त्रापिग्रंथांतरेयथाआयाति। सार्द्धषड्वर्गतः सदलषड्विंशदंगुलैस्त्रिभुजैस्तुल्यभुजंत्रिको
णंकुंडंस्यात्। अत्रफलोपपत्तिः। अधोभुजार्द्धं १८१२ मावाधाभुजः ३६१४ आबाधा
कृतिः ३३३१०१४ भुजकृतिः १३३२१२ अनयोरंतरं ८८८१२ अत्रास्यमूलं ३८१४६१
लंबः। लंबगुणंभूम्यर्द्धंस्पष्टंत्रिभुजेफलंभवतीतिफलं ५७६ अत्रापिग्रंथः। वाज
पेयिनांत्रिभुजेफलं ५७३९६ अत्रस्वरआयः। यवांघ्रिसमेनवेदयवयुग्विंशै
रंगुलैर्द्विमाहृतकंभवति। एतदुक्तंभवति। सपादचतुर्यवयुतत्रयोदशांगुलैः।

१३।७।२वृत्तंकार्यंतदेववृत्तेकुंडंस्यात्॥ अत्रफलोपपत्तिः॥ व्यासः २७।०।४ परिधिः ८५।
१ गुणितव्यासः २३०७ पादः ५७।६ फलंतदेव। फलंतदेव। वाजपेयिनांफलं ५७।२।२ अत्रवि
पाचतुरंगुलांतरेसौरमेयआयः। परकुंडान्याहासार्द्धांत्रोधीति१सार्द्धचतुर्थयेवयु
क्तैकत्रिंशदंगुलैः पाश्चुखपत्मश्चुखेत्रिभागेयोगंघातेत्र्यस्रद्वयेकृतेषट्कोणंकुं
डंभवति। अत्रफलोपपत्तिः। पूर्वमेकत्रिकोणेआबाधा १५।६।२ भुजः ३१।४।४ आबाधा
कृतिः २४१।८०।५३ भुजकृतिः ९९६।०७ ३ अंतरं ७४२ मूलं २७।२।६ लंबगुणं भूस्पर्द्धं ४३७।४
अन्यत्रलघुत्रिकोणेभुजः १०।४।१ आबाधा ५।१२ कृती १००।२ आबाधाकृतिः २७।४ अंत
र ८३ मूलं ९।१।२ लंबगुणं भूस्पर्द्धं ९८।१२ द्वत्रगुणं २४४।३ पूर्वफलेयुक्तेजातं ५७।६॥ वा ८
जपेयिनांमृदंगाकारफलंपूर्वमायाति। परंत्विदंषट्कोणंमनोहरंपूर्वमेकंवृत्तंसा

र्द्धदशांगुलंव्यासार्द्धेनकर्त्तव्यं। परसपादयवयुक्तत्रिंशदंगुलैर्वृत्तंकार्यंततःकें
द्रान्मध्यात्कर्कटकंप्रसार्यबाह्येवृत्तेष्टौदिशोंकयेत्। दिक्चिह्नानिकुर्यात्ततो
मध्यवृत्ताद्दिगंकपर्यंतंतदिग्मध्यतोष्टमित्स्त्र्यस्रैःकृतैःपद्मकुंडंभवति। अत्रफलोपप
त्तिः। आदावेकपत्रफलंसाध्यते। तद्यथामध्यवृत्तेव्यासः २५ परिधिः ७८।४। अत्राष्टस्वि
वत्। द्विद्विनंदेषुसागरैः ४५९२ वृत्तव्यासेसमाहतेरखखाब्धिअत्राकसंमक्केल्पज्याजी
वा ९।४ ज्याव्यासयोगांतरघातमूलंव्यासःतद्दूनोदलितःशरःस्यादिति जातःशरः १
मध्येशेष १।४ अत्रमध्यत्रिकोणेयंलंबः १ अनेनलंबेनगुणितंभूस्पर्द्धं जीवा ९।४ स्पर्द्धं ९।४।६
जातंपूर्वखंडफलं ५।४।५ उत्तरखंडेलंबः ३।५ भूस्पर्द्धं ४।६ लंबगुणंजातं ७।३ अनयो
र्योगः ७ अष्टगुणः ५७।६ फलंतदेववाजपेयिनांप्रागुक्तफलं ५७।२।२ बाह्यवृत्तफ

लं१७६ प्राक्फलेशानिते शेषं २४६ अस्यार्द्धं १२३ प्राक्फले योजिते जातं फलं ५९९ अत्रो
ष्टांगुलमंतरं कुंडांतस्मात् ॥ आरूस्येति ॥ ॥२३॥ आरूस्येति छंदसः स्वरव्यासुकर्त्विंशति
स्तयास्तुल्यांगुलैश्चतुरस्रे कृते पतिदिशं चतुर्द्दिक्षु वेदांगुलैः कुक्षिः कार्य्यस्तदयतः तत्तुल्यां
गुलैस्यांनात्पार्श्वयोः पादद्विहीनषडंगुलेषु कर्णौ विरचयेत् । इत्यष्टास्त्रकुंडं भवति । अ
त्र फलोपपत्तिः । चतुरस्रफलं ५७६ एकात्रिकोणे लंबः भुजार्द्धं ५ द्विलंबगुणां २३ चतुर्गु
णां ९२ सर्वफले युक्ते जातं ५७६ वोजपेयिनामष्टास्त्रिफलं करणीगतं कष्टसाध्यमस्ति
इदं दिक्कोणमष्टास्त्रिस्य पष्टाष्टं त्र्यंगुलव्यासार्द्धेन वृत्तं कार्य्यं । न तत्साद्धाष्टादशांगु
लैः परं वृत्तं कार्य्यं ततो मध्यात् ८ त्रांत्त्र शरांगांकितात् कृत पंचांशचिह्नाद्बाह्येरेखान्य
स्यके पंचके विरचिते शरास्त्रं पंचास्त्रं कुंडं भवेत् । अत्र फलोपपत्तिः । मध्ये पंचास्त्रि ५

कुंडस्य पूर्वमाने पंतत्रव्यासः २२ परिधिः ६९ अस्य पंचमांशो धनुः १३।६ अस्य जीवा पंचा
स्त्रिप्रकारेण तेदाग्निपंचरवाश्विहृत व्यासे समाहते खखखखा त्र्यर्कसंगुक्तेलब्धो भुजः १२
।७ जीवा स्वरूपः । एवं चापकृ यं ज्परित्तनं २७।४९ अत्र जीवासाध्या । चापोननिघ्नपरिधिः प्रथ
मकृयः स्यात् पंचादवः परिधिवर्गचतुर्थभागः आद्योनितेन खलु तेन भजेत् । चातुर्घ्नव्यास
हतं प्रथम । मासमितं स्यकास्यान् । इत्याजाता जीवा १०।६ हरे यत् भुजा ता पष्ट्योकारं तेत्र
मुत्पन्ने अत्र मुखो नानांतः कार्यामुखं १२।७ ऊना भू ६ । अस्यार्द्धं मा ३।४।० बाधाद्र्यं
माबाधा लंबः १०।४ लंबेन निघ्नं कुमुखैक्य खंडे कुमुखैक्य ३३।६ खंडं १६।७ निघ्नं २०६।५
फलं जातं अस्य क्षेत्रस्य रूपो भुजः आबाधा १०।३ भुजः १२।७ कृत्योरंतरं ५६।७ मूलं ७।४ अत्र
कोटि २०।३३।४ अनयोर्घातः ७८।४ अनयोः फलयोर्योगः २८४।१ बाह्यत्रिकोणभुजः

११।२ आबाधा ६।३ लंबः ८।६ लंबगुणे भूम्यर्द्धे ६।३।४ गुणां ५८।४ पंचगुणां जातं २२।२
पूर्वफले युक्तं जातं फलं ५७६।४ तदेव समास्त्रिकुंडे स्यात्॥ ॥त्र्यक्षै रिति॥ १४ त्रियव
युक्तचतुर्द्दशांगुलव्यासार्द्धमानेन वृत्तं विरचयेत्। तत्र सपादपादत्र्यांगुलैः ११।२
समदोः स्तान् भुजान् सप्त विरचयेत्। इति सप्तकोणकुंडं भवति। अत्र फलोपपत्तिः। वृत्त
क्षेत्रे व्यासः २८।६ परिधिः ९०।२ गुणितव्यासपादः ६४८।५ अतः सप्तचापानां क्षेत्र
मध्ये देकत्वाज्यार्थे भुजः ११।२ अस्यार्द्धं ५।१ भुजः ३।२ कोटिः फलं ८।३ अस्य
दोःकोटिवर्गैक्यमूलं कर्णः प्रजायते। अनयोर्वर्गविवरान्मूलं कोटिभुजौ स्फुटौ। स
प्तगुणं ५८।४ शेषचापानां देवे क्षेत्रे अस्य भुजः ज्या ६।२।४ अर्द्धं ३।१।२ भुजः ३।२ स्फुट १०
।२।४ कोटिघातः आयते चतुरस्रे चाङ्कज कोटिवधः फलं तस्यार्द्धं अस्य फलं स्यात्।

त्र्यायययोगांतरेति नाना ७।९७ चतुर्द्दश गुणः २३।६ पूर्वफलेय युक्तः ७२।३ पूर्वफला
न्वेषिते शेषं ५७६।२ एतत् कुंडं स्यात्। पंचकोणसमासिलक्षणं अभिचाराय अभिचारा
र्थं भवति। पद्यानि सर्वोपसर्गास्पदीर्घैने नि। अभीचाराय अष्टकुंडानि अष्टदिशां क्रमा
त्कपानि। अथ कुंडव्यासस्पजिनलवाद्वतुर्विंशी यामिता कुंडाद्दहिस्त्रिस्त्रो मेखला
भवंति। किंलक्षणाः नवषट्त्र्यंगुलैरुन्नताः। आद्यानवांगुलोन्नता। द्वितीया षडं
गुलोन्नता। तृतीया त्र्यंगुलोन्नता। पुनः किंलक्षणा वेदादीनां गुणविस्तृता। प्रथमा
चतुरंगुलविस्तारा। द्वितीया द्व्यंगुलविस्तारा तृतीया त्र्यंगुलविस्तारा। इति
त्रिमेखलाः॥ मनोतरमात्। वांछत्सुच्छितातिकिंच। केचमेखलानो न्नतिविस्ता
रैतुल्यतया वांछंति। अयमर्थः पूर्वमेखला नवांगुलोन्नता कार्या तां चतुर

गुलविस्तृता चतुरंगुलोन्नतास्मात्॥ द्वितीया त्र्यंगुलोन्नता कार्या॥ तां त्र्यंगुलोन्नतास्
त्मात् तृतीया च द्व्यंगुलोन्नता द्व्यंगुलविस्तृता कार्या॥ इति वाह्ये पार्श्वे इति केषांचिन्म
ते। वप्रत्रयमेवमेखला निवेशस्यान्तदा वेदांगुलैरुच्छ्रितविस्तृता कार्या॥ पंचमेखला
अनीशास्तदा षडंशा पंचांशा चतुरंशौ रांत्रांशा द्व्यंश विस्तृताः कार्याः॥ उन्नतात्वेष्वयुक्त
मेखलायां नवांगुलमितमनुवर्त्तते॥ प्रथमा नवांगुलोन्नता॥ षडंगुलविस्तृता चतु
र्थी द्विपादपंचोच्चा त्र्यंगुलविस्तृता॥ पंचमी द्व्यंगुलोच्चा द्व्यंगुलविस्तृता॥ एवं सर्वमेखला
विस्तारैकं वा द्विर्विशांगुलस्थलमाक्रमंति॥ ऊर्ध्वं नवांगुलमितमेव॥ अत्रोन्नतत्वं
पंचमांशेन ह्रसते॥ एकहस्ते पंचांशाः १.८ नवस्य शोधितः शेषं ७.२ द्विहस्ते द्वि ११
गुणः ३.६ नवस्य शोधिते शेषे ५.४ चतुर्हस्ते चतुर्गुणः ७ नवस्य शोधिते शेषे १.८ त्रि

हस्ते त्रिगुणाः ५.४ नवस्य शोधिते शेषोन्नतं शेषे ३.६। एवं पंचमेखलानामुन्नतत्वं ९।८।७।५।
३।२। इति पंचमेखलापद्धतिः॥ अथ द्वादशांगुलायतिः द्वादशांगुलायता अष्टांगुलविस्तृ
ता॥ एकांगुलकार्ये कुंडान्तरे विशति। तन्मध्ये विलेयस्याः सा एवंविधा योनिः स्या
दित्युक्तेन रेणाग्रयः। शेषकुम्भमाद्य। योनिरिति। सा योनिर्नालनितंबयुक्ता कार्या योनिप
श्चिमभुजे द्व्यंगुलविस्तृतेन कटिकः नश्रो। पीठो कार्या। श्रोणीपोरन्तरा भुमेरारम्भ सान्ति
दे नालं कार्यं॥ एवं योनिः संपद्यते। सा योनिर्नैगे योनिकुंडेन भवति॥ अथ कुंडमध्ये
कुंडसदृशाः। कुंडाकार षान् द्व्यंगुलोच्छ्रितश्चतुरायामो नाभिः कार्याः। तत्र चतुरस्रे तु
यथोक्त एव कार्यः। योनिकुंडादिष्वनुपातेन भुजषडंशपातेन तद्भुजव्यासाद्या
नयनं। योनिकुंडे भुजमानं। ५८.०.५ अर्द्धचंद्रे व्यासार्द्धं ३.२.१४ त्रिकोणे भुजः ५८.७

वृत्ते व्यासार्द्धं १२।१ षट्कोणे भुजः ५।२ पद्मे मध्ये व्यासार्द्धं रवाद्रिः २।४ अष्टास्रिकुंडे भुजः
३।५ दिक्षु वृत्तार्द्धे ०।५ पंचास्त्रे व्यासार्द्धं १।९ भुजः १।२ त्रिकोणे भुजः २।५ सप्तास्त्रे व्यासार्द्धं १।३ भु
जः १।०।२ अनेन क्रमेण कुंडाकारो नाभिः कार्यः। अथ खातोर्ध्वं तुल्यं भुजः कुंडसदृशो
मेखलाचितः कार्यः। मेखलाधिकुंडसदृशी कार्या। चेत्पंच कुंडी मतास्त्वेष्टा तदा प्रति
दिशं चतुर्दिक्षु चत्वारि कुंडानि कार्याणि। शिरस्यितं पंचमं कुंडं प्राचीशानदिगंतराल व
र्ती। प्रागीशानायामध्ये भवति। गोष्ठुनवसु कुंडेष्वभिप्रेतेषु तुल्यं कुंडं वृत्ते नवमं कुंडं प्रा
चीशानमध्ये भवति। शेषाण्यष्टसु दिक्षु कार्याणि॥ योनिविशेषमाह। प्रागादित्रि
ष्वपि। प्राच्यादिषु त्रिषु कुंडेषु प्रागाग्नेययाम्यकुंडेषु। अधिमेखलं मेखलामध्ये य
मदिग्योनिः। यमदिशि दक्षिणदिशि योनिः स्यात्। नैर्ऋत्यादिषु पंचकुंडेषु नव १२

मे पश्चाद्दिशि योनिरधिमेखलं स्यात्। सा योनिः परदिशि पश्चिमदिशि उन्नता। गुरुर
त्वादये नता कार्या। अथ वेदास्रे चतुरस्रे क्षेत्रे वेदयोर्भुजयो राशि इति। क्षेत्रफलं भवति
अदःफलं अंगादिषु तुल्यं ५७६ ।। कहस्तस्यैतत्। तदादि अयादिहस्तेषु अभिप्रेतेषु तेनाभि
हतहस्तांकेनाहतं कार्यं अतः पदं ग्राह्यं। द्व्यादिभुजं ते पदेन बाहुर्भवति। चतुर्दिक्षु प्र
माणं स्यात्। तद्यथा। द्विहस्ते अष्टवेदांकं फलं ५७६ द्विगुणं ११५२ अस्य पदं ३३।७।५ एवं द्वि
हस्ते चतुरस्रे भुजो जातः। एवं त्र्यादिषु त्र्यादिघ्नात् सर्वफलान्मूलमानेयं। तेन क्रमेणां
त्यादीनां भुजा भवंति। दशहस्तपर्यंतं नानानि यलिख्यंते॥ ॥एकस्यैवेति। एकहस्त
भुजमानं जिनाख्य चतुर्विंशत्यंगुलानि भुजः द्वयोर्बाहुः। युगयुग्मास्त्रिषु कोष्ठिताः
। इति त्रीस्त्रिंशदंगुल्यानि सप्तवे यवाः पंचयूकाः ३३।७।५ अस्य वर्गः ११५२। अत दं मा

नमागतंयथार्थंत्रिहस्तेकुंडेभुजःपंचयूकाःचत्वारोयवाःऽऊनिगमाः।।कचत्वा
रिंशदंगुलानि४८।१५।४५भुजमानंतुयेचतुर्हस्तेनिवेतेऽशाधिमताःअष्टचत्वारि
शदंगुलानि।अथत्वारेपंचहस्तेकुंडेनिवेतेगुणाशाशान्त्रिपंचाशदंगुलानिपंचय
यवास्त्रिसो।यूकाः।५३।५६।३५।णोहस्तानांभुजोष्टशाशान्नष्टपंचाशदंगुलानियवा
।।स्सार्द्धद्वियूकाधिकाः।५८।६।२८।४।एतेषांवर्गेषुद्विगुणेत्रिगुणेचतुर्गुणेपंचादिगु
णेपंचादिगुणितेनफलैःसंवादित्वंनवति।वाजपेयिभिःस्थूलमानेनविस्तारांगु
लमानमित्याद्यकृतमस्तितत्रांतरमायातियदप्येतत्सूक्ष्ममानमावश्यमत्राकं।।
तथापिगणितनिर्वाहार्थमत्रलिखितं।तत्रविस्तारांगुलमानमित्यत्रपाठेवेदत्रिणि १२
इत्युक्तंतत्रचतुः।।स्त्रिंशतोवर्गः१२९६तत्रचतुरंगुलमंतरमेवंसर्वत्रवर्तते।।स

ज्ञानमि।सप्तानांहस्तानांभुजःसपादाश्त्रिषष्टिमितः।योंगुलयः६३।४अष्टानांहस्ता
नांभुजःसप्तांगांगुलयः।सप्तषष्ट्यंगुलानि।नगमिताः।सप्तयवाःविपादयूकाः
लिक्षाः।६७।७।६नवानांभुजोष्टसप्ताद्विसप्तत्यंगुलानि७२दिशांदशानांहस्तानांभु
जोरसनगाः।षट्सप्तत्यंगुलयोयूकापंचकवर्जितामिति।७६।७।३।वेदशहस्त
पर्यंतंभुजमानमुक्तं।इदंचतुरस्रकुंडविषयंवरांगादिकुंडेषुकिंकार्यमित्य
तत्राह।यावंतोभुजाहस्ताहोमानुसारेणसम्मताः।यावद्धस्तमितकुंडमपि
येतेवावद्धस्तांगुलमितकाष्टैःस्वर्गांनीतनरपंचमोंशाद्धस्तांगुलैर्मित्यासमकाष्टैःसं
पादनीयं।समकवित्यर्थः।पुनस्तत्रकाष्ठेजिनैश्चाहुर्विंशत्यंकैःकृतैस्तावन्मितंहि
हस्ताद्युकुंडेध्यंगुलमानमागतंततस्तैरंगुलैःस्वर्ववक्रियानिबद्धिणातंकंत

वतिहिहस्तामानं२२ऽ७ऽ५ऽ। एतावद्भिः पूर्वानीतांगुलैः ऊर्ध्वं परिमाय तत्र कंबायां त्रिवित्रा
स्तिकाः कार्याः तदंगुलमानं तैरंगुलैः सार्द्धद्विधान्याधिकोत्रिंशत्रांगुलिरित्यादिनाऊंडश्च
नाकार्या। मेखलायोनिनाभिकं वखानास्तैरंगुलैर्भवति। एवमंके त्रोप्यतां विना।
खिलाध्वेसमायाति। अत्र किल याज्ञवल्क्यः सर्वविघ्नोपसर्गविनाशाय विनायक
स्नपनमुक्तं। स्नपनं तस्य कर्तव्यं पुण्येन्हि विधिपूर्वकं। भद्रासनोपविष्टस्य स्वस्तिवाच्या
द्विजाः शुभा। इति तत्र भद्रमासनमिति। भद्रं कल्याणं सुखकृदासनं श्रीपर्ण्यादिस
दारुनिर्मितं चोपलभ्यते। तथापि देवालये द्वादश प्रतिष्ठादौ दृष्ट्वा वायुकोणे भद्रपीठमिष्ट
कानिर्विधीयते। अन्यच्च। ग्रहहोमांतरं कर्णोविंदं शब्दंगुलसंमितमिति वसिष्ठोक्तम्
लमवलंब्यात्र विनायकस्नपनविधौरमगजैः षडशीत्यंगुलैर्वेदिं प्रागुक्तदिक्सा ९४

धनप्रकारांतरेणाप्रसारितसूत्रैः समकर्णं चतुरस्रं सूत्राणां विरचय्य तत्र हस्तदि
शि ईशानकोणे मरुत्कोणे रज्जुसंसक्तमूलेभिः प्रमाणेय हस्तस्थापनस्थानार्थं वे
पीठं विरचयेत् तदुक्तं भवति। षडशीत्यंगुलैः पूर्वोदितप्रकारेण द्वोसमकर्णं चतु
रस्रां वेदीं संसूत्र्य तत्रेशानकोणे पूर्वानीतद्विकरबाहुमानेन २३ऽ७ऽ५ऽ चतुरस्रं
समकर्णं पूर्वोत्तररज्जुसंसक्तमूलं यस्य पीठं कुर्यात्। एवं मरुत्कोणे तावतैव माने
न२३ऽ७ऽ५। सोम्यापररज्जुसंसक्तमूलं स्नानपीठं कुर्यात्। तयोः प्रागपरमंतरं ४०
ऽ०६ अथानलेवह्निकोणे भद्रपीठस्य समकर्णेन याऽपाक् दक्षिणे पुरस्तात्स्थ
वेदित्रिपंचांगुलान्युत्सृज्य तेयथा तथा करमितमां वच्येबायाः पीठं विरचय्य एत
दुक्तं भवति। आग्नेयकोणे भद्रपीठस्य समकर्णेन या प्राग्दक्षिणे पंचपंचांगुला

निम्नकाचतुर्विंशत्यंगुलमंबिकापीठंविरचय्य।अथयदनन्दपीठंबिकापीठा
न्नित्री।एपपिश्चमंगुलैः उच्चैः काय्योणि।अथनिरृतिजंनिरृतिकोणनवमनल
स्पवक्रैःपीठंचस्तयाम्स्पेपश्चिमदक्षिणेत्रिस्त्रिरंगुलानिम्नकाष्टनेत्रैरष्टविंशत्या।
त्यंगुलैरायतंविस्तीर्णंयुगेश्चतुरंगुलैरुच्चंसचतुरस्त्रंमाचकोणंहोमपीठंविरचय्य
य।एवंकृतेविनायकस्नपनार्थंवेदीपीठानिम्नष्टानिस्पः।चतुर्णांकार्यास्सूत्रे
समतयाभवतः।अत्रकोचनशाकांचचत्वारिचदक्षिणस्यांत्पन्नाविधेयंगणे
पस्यपीठं।पश्चात्त्रयंदक्षिणतोद्वयंचविहायपीठद्वयनस्पकृत्यादित्यादीनि
ग्रामयाचकीयवाकानिपठंतितान्युपेक्षणीयानि।मंडपेनवकुंडीविधानेवेदी १५
कोणमंडपकोणकुंडकोणाःसमसूत्रस्यत्रीणिवस्तुः।एवमत्रापिकर्णविधेन

वेदिघ्नस्तुक्रेश्च।अथात्रगणितंषडशीतिवर्गः७३९६द्विगुणाः१४७९२अस्यमूलं
१२१५अयंवेदिकर्णः।यद्दपीठकर्णः४७होमपीठेकर्णः३९५४होमपीठान्नैरृ
तिकोणेकर्णः४५२।षांयोगः९२५४वेदीकर्णाच्छोधितेशेषं३०२दंहोमयद्दपीठां
तरंवसिष्ठोक्तं।एवंनन्दपीठेकर्णः४७।अंबापीठेकर्णः३३६१५अंबापीठादाग्नेयय
कोणेकर्णः७५१।षांयोगः८७वेदीकोणाच्छोधितेशेषंनन्दपीठांबापीठांतरं३२१
५होमांबापीठांतरं२६ग्रहांबापीठांतरं२३०६३नन्दहोमपीठांतरं९५।एवंसर्व
निःसंदिग्धंभवति।आद्यानामिति।अत्राद्यमानुष्टुप्परागणित्रशार्दूलविक्रीडिता
न्तिमंडपाच्छादनस्नपनहवनेस्रग्धराख्ये॥ ॥इतिराजगुरुमहादेवविरचितःकुं
डपदीपकःसमाप्तः॥ ॥लेखकपाठकयोःशुभंभवतु॥ ॥७॥ ॥छ॥ ॥

